अपरोक्षानुभूति of शंकराचार्य with gloss of दीपिका of विद्यारण्य — Edited by Pt. नवचन्द्र शिरोमणि and Pub. by भुवनचन्द्र वसाक at नारायण प्रेस. Calcutta, 1890.

brittle condition so the careful handling is needed.

(7)

Bill No. 5/07-08

18

2008-0475

1336

Indira Gandhi National Centre for the Arts

Indira Gandhi National
Centre for the Arts

B·40

DATA ENTERED
Date. 24/06/08

KALANIDHI
Rare Book Collection
IGNCA
ACC No.: R-475
Date: 26.3.08

SANS
181.482
SHA

अपरोक्षानुभूतिः ।

टीकया सहिता ।

श्रीमच्छङ्करभगवता विरचिता ।

श्रीयुक्त नवचन्द्रशि[illegible]म[illegible]ना परिशोधिता ।

मा

श्रीभुवनचन्द्रवसा[illegible]न प्रकाशिता ।

(८ नं० निमतलाघाट ष्ट्रीट्)

Indira Gandhi National
the Arts

कलिकाता[illegible]गरे

१६ नं० नूतनपगयापटी

नारायणयन्त्रे

मुद्रिता ।

इंराजी १८९० सन १२९६ साल ।

1336

अपरोक्षानुभूतिः ।

श्रीहरिं परमानन्दमुपदेष्टारमीश्वरम् ।
व्यापकं सर्वलोकानां कारणं तं नमाम्यहम् ॥ १ ॥

स्वप्रकाशस्य हेतुर्यः परमात्मा चिदात्मकः ।
अपरोक्षानुभूत्याख्यः सोऽहमस्मि परं सुखम् ॥ १ ॥
ईशगुर्वात्मभेदाद्यः सकलव्यवहारभूः ।
औपाधिकः स्वचिन्मात्रः सोऽपरोक्षानुभूतिकः ॥ २ ॥
तदेवमनुसन्धाय निर्विघ्नां स्वेष्टदेवताम् ।
अपरोक्षानुभूत्याख्यामाचार्य[illegible]ं प्रकाशये ॥ ३ ॥
यद्यपीयं स्वतः स्पष्टा तथापि [illegible]ात्मसिद्धये ।
यत्नोऽयं सोऽपि संक्षेपात् क्रियतेऽनर्थनाशनः ॥ ४ ॥
क्वाहमुल्काकरः क्वायं सूर्य्यस्तेजोनिधिः किल ।
तथापि भक्तिमान् कः किं न कुर्य्यात् स्वहितासये ॥५॥

तत्राचार्य्याः स्वेष्टपरदेवतानुसन्धानलक्षणं मङ्गलं निर्विघ्नग्रन्थसमाप्तये स्वमनसि कृत्वा शिष्यशिक्षायै ग्रन्थादौ निबध्नन्ति श्रीहरिमिति । अहं तं नमामीत्यन्वयः । अत्रेयं प्रक्रिया-पदार्थौ द्विविधः आत्मानात्मा चेति तत्रात्मा द्विविधः ईश्वरो जीवश्चेति एतावपि द्विविधौ शुद्धाशुद्धभेदात् । तत्राशुद्धौ मायाऽविद्योपाधित्वेन भेदव्यवहारहेतू शुद्धौ त्वभेदव्यवहार-

Indira Gandhi National

हेतू तथानात्मापि त्रिविधः कारणसूक्ष्मस्थूलभेदात् । अतएव शरीरत्रयमिति व्यवह्रियते एवं चिज्जड़रूपवैलक्षण्यात्तमः-प्रकाशयोरिव विभक्तयोरुभयोरात्मानात्मनोरविवेक एव बन्ध-कारणं तयोर्विवेकस्तु मोक्षकारणमिति दिक् । तत्र ताव-दहंशब्देन देहत्रयविशिष्टत्वेनाशुद्धो जीवः अस्यैवापकृष्ट-त्वात् । तं नमामि मायातत्कार्य्यहन्तृत्वेऽपि तदाश्रयभूत-त्वेन सर्वकारणं वेदान्तप्रसिद्धमिश्वरम् एतस्यैव सर्वोत्कृष्ट-त्वात् नमामि नमस्करोमि स्वात्मत्वेनानुसन्दधामीत्यर्थः । तस्यैव सर्वोत्कृष्टत्वेनानुसन्धानयोग्यत्वमाह श्रीहरिमिति । श्रियन्दधानमित्यर्थः । यद्वा स्वाश्रयतया श्रियते स्वीक्रियते प्रलयसुषुप्त्यादौ सर्वैर्भूतैरिति । श्रीर्जीवत्वोपाधिभूताऽविद्या तां हरत्यात्मज्ञानप्रदानेन नाशयतीति श्रीहरिस्तम् । यद्वा स एव सर्वाधिष्ठानतया श्रीरित्युच्यते श्रीरेव श्रीहरिस्तम् । ननु किमनेनाविद्यातत्कार्य्यहरणेनेत्याशङ्क्य परमपुरुषार्थ-प्राप्तिर्भवतीति सूचयितुं तस्य परमानन्दरूपतामाह परमा-नन्दमिति । परमोऽविनाशित्वनिरतिशयत्वाभ्यामुत्कृष्ट आ-नन्दः सुखविशेषस्तद्रूपमित्यर्थः । तर्हि वैषयिकसुखवज्जड़ः स्यादित्यत आह उपदेष्टारमिति । आचार्य्यद्वारात्मसुखोप-देशकं चिद्रूपमित्यर्थः । ननु केवलानन्दस्य कथमुपदेष्टृत्व-मित्यत आह ईश्वरमिति । ईष्टेऽसावीश्वरः विचित्रशक्ति-त्वात् सर्वसमर्थस्तं नमामीत्यन्वयः । एवमपि परिच्छिन्नत्वात् घटादिवदनात्मत्वं स्यादित्यत आह व्यापकमिति । स्वसत्ता-प्रकाशाभ्यां नामरूपे व्याप्नोति सव्यापकस्तं परिच्छेदकस्य देशकालादेर्मायिकत्वादनन्तमित्यर्थः । ननु व्याप्यव्यापक-

Indira Gandhi National

अपरोक्षानुभूतिर्वै प्रोच्यते मोक्षसिद्धये।
सद्भिरेव प्रयत्नेन वीक्षणीया मुहुर्मुहुः॥ २॥

भावेनानन्तत्वमसिद्धमित्यत आह सर्वलोकानां कारण-मिति। अभिन्ननिमित्तोपादानमित्यर्थः सत्यं ज्ञानमनन्तं ब्रह्म आत्मनात्मानमभिसंविवेशेत्यादिश्रुतेः॥ १॥

इदानीं प्रेक्षावत्प्रवृत्तयेऽनुबन्धचतुष्टयं दर्शयन् स्वचिकीर्षितं प्रतिजानीते अपरोक्षेति। वै इत्यव्ययेन विद्वदनुभवं प्रमाणयति। तथाचायमर्थः विद्वदनुभवप्रसिद्धा या तत्त्वमस्यादिमहावाक्यश्रवणजा प्रत्यगभिन्नब्रह्मविषया अपरोक्षानुभूतिः अक्षाणामिन्द्रियाणां परमर्तद्भूतं न भवतीत्यपरोक्षमिन्द्रियाधिष्ठानतत्प्रकाशत्वाभ्यां नित्यप्रत्यक्षस्वप्रकाशात्मतत्त्वं तस्यानुभूतिर्वृत्त्यारूढाखण्डता। यद्वा अपरोक्षा चासावनुभूतिश्चेत्यपरोक्षानुभूतिर्विद्याऽपरपर्यायो ब्रह्मसाक्षात्कारस्तत्साधनग्रन्थोऽप्युपनिषच्छब्दवदपरोक्षानुभूतिशब्देनोपचर्य्यते झटित्यवलोकनमात्रेणैवोत्तमाधिकारिणां ब्रह्मात्मसाक्षात्कारकारणं ग्रन्थविशेष इत्यर्थः। अनेन नित्यापरोक्षब्रह्मात्मतत्त्वं विषयो दर्शितः स प्रोच्यते प्रकर्षेण तत्तदाशङ्कानिराकरणपूर्वकं सिद्धान्तरहस्यप्रदर्शनरूपेणोच्यते कथ्यत इत्यर्थः अस्माभिः पूर्वाचार्य्यैरित्यर्थादध्याहारः। ननु प्रायः प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तत इति न्यायान्नारम्भणीयो वन्य इत्याशङ्क्य प्रयोजनमाह मोक्षसिद्धय इति। मोक्षो नाम स्वाविद्याकल्पितानात्मदेहाद्यात्मत्वाभिमानरूपबन्धनिवृत्तिद्वारा स्वस्वरूपावस्थानं तस्य सिद्धिः प्राप्तिस्तदर्थम्।

स्ववर्णाश्रमधर्म्मेण तपसा हरितोषणात् ।
साधनं प्रभवेत् पुंसां वैराग्यादिचतुष्टयम् ॥ ३ ॥

अनेन सर्वानर्थनिवृत्तिद्वारा परमानन्दावाप्तिरूपं प्रयोजनं दर्शितम् । किं लक्षणापरोक्षानुभूतिः सद्भिः साधुभिर्नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसम्पन्नैर्मुमुक्षुरित्यर्थः ; एवशब्दान्नान्यैः कर्मोपासनाधिकारिभिरिति भावः ; मुहुर्मुहुर्नैरन्तर्य्यदीर्घकालाभ्यासप्रयत्नेन स्नानभिक्षादावप्यनादरं कृत्वेत्यर्थः ; वीक्षणीया गुरुमुखादवगत्य विचारणीया अनेन मुमुक्षुरधिकारी दर्शितः । एतेनैवार्थात् पूर्वकाण्डोत्तरकाण्डयोः साध्यसाधनभावः सम्बन्धश्च दर्शितो भवतीति बोध्यम् ॥ २ ॥

ननु कार्य्यस्य कारणाधीनत्वात् पूर्वोक्तसाधनचतुष्टयस्य किं कारणमित्याशङ्काह स्ववर्णेति । अथ स्वशब्देन मुख्यगौणमिथ्याभेदेन त्रिविधेषु साक्षिपुत्रादिदेहादिलक्षणेष्वात्मसु मध्ये मिथ्यात्मायोग्यत्वादुच्यते तस्य देहादेर्ब्राह्मणादिवर्णब्रह्मचर्य्याद्याश्रमप्रयुक्तेन धर्मेण ब्रह्मार्पणकृतकर्म्मानुष्ठानजन्येनापूर्वेण पूर्वमीमांसाप्रसिद्धेन भाविफलाधारभूतेन पुण्यादिशब्दवाच्येनेत्यर्थः । तथा तपसा कृच्छ्रचान्द्रायणादिना प्रायश्चित्तेनेत्यर्थः । पुनः हरितोषणाद्भगवत्प्रीतिकरात् सर्वभूतदयालक्षणात् कर्म्मविशेषात् एतैस्त्रिभिः साधनैः वैराग्यादिचतुष्टयरूपं साधनं मोक्षसाधको धर्म्मविशेषः पुंसां प्रभवेत् सम्भावनायां लिङ् । यद्वैवमन्वयः स्ववर्णाश्रमधर्म्मरूपेण तपसा कृत्वा यद्धरितोषणं तस्मादिति । यद्यपि

ब्रह्मादिस्थावरान्तेषु वैराग्यं विषयेष्वनु।
यथैव काकविष्ठायां वैराग्यं तद्धि निर्म्मलम् ॥४॥
नित्यमात्मस्वरूपं हि दृश्यं तद्विपरीतगम्।
एवं योनिश्चयः सम्यग्विवेकोवस्तुनः स वै ॥ ५ ॥

साधनचतुष्टयस्य विवेकादिक्रमेण हेतुहेतुमद्भावस्तथापि वैराग्यस्यासाधारणकारणतां द्योतयितुमादौ ग्रहणं कृतमिति बोद्धव्यम् ॥ ३ ॥

कीदृशं वैराग्यादिचतुष्टयमित्याकाङ्क्षायां तत्स्वयमेव व्याचष्टे ब्रह्मादीत्यारभ्य वक्तव्या सा मुमुक्षुतेत्यन्तेन श्लोकषट्कात्मकेन ग्रन्थेन। तत्रादौ वैराग्यस्य लक्षणमाह ब्रह्मादिस्थावरान्तेष्विति ब्रह्मादिस्थावरान्तेषु सत्यलोकादिमर्त्यलोकान्तेषु भोगसाधनेषु अनु कर्म्मजन्यत्वेनानित्यत्वं लक्षीकृत्येत्यर्थः। वैराग्यमिच्छाराहित्यम्। तत्र दृष्टान्तमाह यथैवेति। यथैव काकविष्ठायां वैराग्यं गर्द्दभादिविष्ठायामपि कदाचित् कस्यचित् ज्वरशान्त्यर्थं ग्रहणेच्छा भवति अतः काकविष्ठाया ग्रहणम्, उपलक्षणमेतद्वान्त्यादीनां विषयेष्विच्छानुदये वैराग्यस्य हेतुगर्भितं विशेषणमाह तदिति। हि यस्मात् तद्वैराग्यं निर्म्मलं रागादिमलरहितम् ॥ ४ ॥

इदानीं वैराग्यकारणं विवेकं लक्षयति नित्यमिति। वै प्रसिद्धं सः वस्तुनः पदार्थस्य विवेको विवेचनविशेषो ज्ञेयः। सक इत्यत आह एवमिति। य एवम्प्रकारेण सम्यक् संशयादिशून्यो निश्चयः। एवं कथमित्यत आह नित्यमिति। हीति। विद्वदनुभवप्रसिद्धमात्मस्वरूपं नित्यमविनाशि अबाध्यं सत्य-

सदैव वासनात्यागः शमोऽयमितिशब्दितः ।
निग्रहोवाह्यवृत्तीनां दम-इत्यभिधीयते ॥ ६ ॥
विषयेभ्यः परावृत्तिः परमोपरतिर्हि सा ।
सहनं सर्वदुःखानां तितिक्षा सा शुभा मता ॥७॥

मित्यर्थः अविनाशी वा । अरेयमात्मेति श्रुतेः । दृश्यमनात्मस्वरूपं, तद्विपरीतगं तदात्मस्वरूपं तस्माद्विपरीतत्वेन गच्छति प्राप्नोति व्यवहारभूमिमिति यावत् तथाविधं विनाशि बाध्यमित्यर्थः । अत्रेदमनुमानमपि सूचितं भवति । आत्मस्वरूपं नित्यं द्रष्टृत्वात् यन्ननित्यं तन्न द्रष्टृ यथा घटादीति केवलव्यतिरेकी हेतुः तथाऽनात्मस्वरूपमनित्यं दृश्यत्वात् यन्नानित्यं तन्न दृश्यं यथात्मस्वरूपमित्ययमपि केवलव्यतिरेकी हेतुः ॥ ५ ॥

तदेवं वैराग्यकारणं विवेकं व्याख्याय वैराग्यकार्य्यं शमादिषट्कं लक्षयति सदैवेत्यादित्रिभिः श्लोकैः । सदैव सर्वस्मिन्नपि काले वासनात्यागः पूर्वसंस्कारोपेक्षा अयं शम इति शब्दितः अन्तःकरणनिग्रहः शमशब्दार्थः । वाह्यवृत्तीनां श्रोत्रवागादीनां निग्रहो निषिद्धप्रवृत्तितिरस्कारो दम इति शब्देनाभिधीयते कथ्यते ॥ ६ ॥

विषयेभ्य इति । हीतिप्रसिद्धेभ्यो बन्धकेभ्यो या परावृत्तिर्निवृत्तिरनित्यत्वादिदोषदर्शनेन ग्रहणानिच्छा सोपरतिरुच्यते इत्यर्थः । कीदृशी सेत्यत आह परमेति । परमम् उत्कृष्टमात्मज्ञानं यस्याः सकाशाज्जायते सा परमा आत्मज्ञानसाधनभूतेत्यर्थः अनया सर्वकर्म्मसंन्यासो लक्ष्यते । किञ्च

निगमाचार्य्यवाक्येषु भक्तिः श्रद्धेति विश्रुता।
चित्तैकाग्र्यन्तु सल्लक्ष्ये समाधानमिति स्मृतम् ॥८॥
संसारबन्धनिर्मुक्तिः कथं मे स्यात् कदा विधे।
इति या सुदृढ़ा बुद्धिर्वक्तव्या सा मुमुक्षुता ॥ ९ ॥
उक्तसाधनयुक्तेन विचारः पुरुषेण हि।
कर्त्तव्योज्ञानसिद्ध्यर्थमात्मनः शुभमिच्छता ॥१०॥

सहनमिति सर्वदुःखानां सर्वदुःखसाधनानां शीतोष्णादिद्वन्द्वानां यत्सहनं प्रतीकारानिच्छा सा शुभा सुखरूपा तितिक्षा मता विदुषामित्यर्थः ॥ ७ ॥

अपि च निगमेति। निगमाचार्य्यवाक्येषु वेदगुरुवचनेषु यद्वोपनिषद्व्याख्यासूपदेशेषु भक्तिर्भजनं विश्वास इत्यर्थः। सा श्रद्धेति विश्रुता वेदान्तप्रसिद्धा। तु पुनः। सल्लक्ष्ये सदेव सौम्येदमग्र आसीदित्यादिश्रुतिलक्ष्ये प्रत्यगभिन्ने ब्रह्मणि चित्तैकाग्र्यं तदेकजिज्ञसेत्यर्थः तत्समाधानमिति स्मृतम् ॥८॥

एवं शमादिषट्कमभिधायैतत्कार्य्यभूतां मुमुक्षुतामाह संसारबन्धेति। इति या सुदृढ़ा बुद्धिः सा मुमुक्षुता वक्तव्येत्यन्वयः। सा केत्यत आह भो विधे मद्दैव। यद्वा सर्वकर्त्तर्विधातर्ब्रह्मन् मे मम संसारबन्धनिर्मुक्तिर्नानायोनिसम्बन्धनिवृत्तिः कदा कस्मिन् काले कथं केन प्रकारेण भवेदित्येवंरूपा बुद्धिर्मुमुक्षुतेत्यर्थः ॥ ९ ॥

इदं साधनचतुष्टयं यदर्थमुपन्यस्तं तदिदानीं दर्शयति। उक्तेति। उक्तानि ब्रह्मादीत्यारभ्य वक्तव्या सा मुमुक्षुतेत्यन्त-

नोत्पद्यते विना ज्ञानं विचारेणान्यसाधनैः।
यथा पदार्थभानं हि प्रकाशेन विना क्वचित्॥११॥
कोऽहं कथमिदं जातं को वै कर्त्ताऽस्य विद्यते।
उपादानं किमस्तीह विचारः सोऽयमीदृशः॥१२॥

ग्रन्थसन्दर्भेण वर्णितानि यानि वैराग्यादिसाधनानि ज्ञानोपकरणानि तैर्युक्तेन पुरुषेणाधिकारिणा देहवता मनुष्योत्तमेन। हीति विद्वत्प्रसिद्धत्वेन वक्ष्यमाणलक्षणः। यद्वा हीत्यव्ययमेवार्थेऽन्यनिषेधार्थं इत्यर्थः। विचारो विवेकः कर्त्तव्य आवर्त्तयितव्यः। किमर्थमित्यत आह ज्ञानसिद्ध्यर्थमिति। आत्मनो ज्ञानसिद्ध्यर्थं ब्रह्मात्मैक्यबोधोद्भवनाय। नन्वात्मज्ञानसिद्ध्या कः पुरुषार्थ इत्याशङ्क्य मोक्षाख्यं चतुर्थपुरुषार्थरूपं फलं द्योतयन् पुरुषार्थं विशिनष्टि शुभमिति। शुभं परमानन्दरूपत्वेन मङ्गलं मोक्षसुखमित्यर्थः। इच्छता प्रार्थयता आत्मनः शुभ[illegible]ति वान्वयः॥ १०॥

ननु ज्ञानसिद्ध्यर्थं विचार एव कर्त्तव्य इति नियमः कुतः क्रियत इत्याशङ्क्य सदृष्टान्तमाह नोत्पद्यत इति। विचारेण विना अन्यसाधनैः कर्मोपासनालक्षणैर्ज्ञानं नोत्पद्यते। तत्र दृष्टान्तमाह यथेति। यथा क्वचित् कस्मिंश्चिद्देशे सूर्य्यादिप्रकाशेन विना पदार्थभानं घटादिवस्तुप्रकाशो न भवति। हीति सर्वजनप्रसिद्धं अतो नियमः क्रियत इति भावः॥ ११॥

तर्हि सविचारः कीदृश इत्यत आह कोऽहमिति। अहं कर्त्ता सुखीत्यादि व्यवह्रियमाणः कः किं स्वरूपः तथा इदं

नाहं भूतगणोदेहो नाहञ्चाक्षगणास्तथा।
एतद्विलक्षणः कश्चिद्विचारः सोऽयमीदृशः॥१३॥

जगत् स्थावरजङ्गमात्मकं कथं कस्माज्जातं किमधिष्ठानमित्यर्थः। तथाऽस्य प्रत्यक्षादिप्रमाणसिद्धस्य जगतः कर्त्तोत्पादकः को विद्यते। वै इति विकल्पं द्योतयति। किं जीवादृष्टं कर्त्तृ किं वेश्वरः किं वान्यदेव विकल्पः। किञ्चेह जगति उपादानं घटस्य मृद्वत् किमस्ति अयमात्मा जगत्कारणविषयः ईदृश एवं स्वरूपो विचारः स एव ज्ञानसाधनमित्यर्थः॥१२॥

ननु चैतन्यविशिष्टः कायः पुरुष इति वार्हस्पत्यसूत्राद्देहाकारेण परिणतानि पृथिव्यादिचत्वारि भूतान्येवात्मेति चार्वाका वदन्ति। स एव कर्त्ता सुखीत्यादि सर्वव्यवहारमूलमिति सर्वजनप्रसिद्धौ सत्यामात्मविषयो विचारो न स्यादित्यत आह नाहमिति। अहमहंशब्दप्रत्ययालम्बनः प्रत्यगात्मा भूतगणो यो देहः स न भवामि तस्य घटादिवद्दृश्यत्वादित्यर्थः। तर्हीन्द्रियगणस्त्वं स्या इति चार्वाकैकदेशिमतमुत्थाप्य दूषयति नाहमिति। च पुनरक्षगणः श्रोत्रादीन्द्रियसङ्घातोऽप्यहं न भवामि तथेति पदेन देहवदिन्द्रियगणस्यापि भूतविकारत्वं दर्शितम्। स वा एष पुरुषोऽन्नरसमयः अन्नमयं हि सौम्य मन आपोमयः प्राणस्तेजोमयो वागित्यादिश्रुतिरुभयत्र प्रमानम्। ननु यदि देहद्वयं त्वं नासि तर्हि शून्यमेव स्या इत्याशङ्क्याह एतदिति। एतद्विलक्षणः एताभ्यां स्थूलसूक्ष्मदेहाभ्यां विपरीतधर्म्मकोऽस्मि

अज्ञानात् प्रभवं सर्वं ज्ञानेन प्रविलीयते ।
सङ्कल्पोविविधः कर्त्ता विचारः सोऽयमीदृशः॥१४॥

एतयोर्यदुपादानमेकं सूक्ष्मं सदव्ययम् ।
यथैव मृद्घटादीनां विचारः सोऽयमीदृशः ॥१५॥

अस्थूलमनण्वह्रस्वमित्यादि श्रुतेः । कश्चिदिति । जात्यादिरहितत्वान्मनोवाचामगोचरत्वं दर्शितम्, अयमीदृशः सविचार इति व्याख्यातार्थश्चतुर्थः पादः श्लोकचतुष्टयेऽपि बोद्धव्यः ॥१३॥

तदेवं कोऽहमित्येतन्निश्चित्येदानीं कथमिदं जातमित्यस्य निश्चयः क्रियते तत्र पृथिव्यादिभूतानि कार्य्यत्वात् स्वस्वपरमाणुभ्यो जायन्त इति तार्किकादयो मन्यन्ते । कर्म्मणो जायन्ते इति मीमांसकाः । प्रधानादेवेति सांख्याः । तदेतन्निराकुर्वन्नाह अज्ञानादिति । सर्वं जगदिदं नामरूपात्मकमज्ञानप्रभवम् अज्ञानात् पूर्वोक्तस्वस्वरूपास्फुरणात् प्रभवति । तथाविधं अतएवैतद्विरोधिना ज्ञानेन स्वस्वरूपस्फुरणेन तम इव प्रकाशेन प्रविलीयते निःशेषलीनं भवतीत्यर्थः । को वै कर्त्तेत्यस्य निर्णयमाह सङ्कल्प इति । विविधो नानाप्रकारः सङ्कल्प इदं करिष्यामीत्यादिलक्षणोऽन्तःकरणपरिणामः कारणानुकूल्यव्यापारवान् कर्त्ता शेषं पूर्वोक्तम् ॥ १४ ॥

अथोपादानं किमस्तीत्यस्य निर्णयमाह एतयोरिति एतयोरज्ञानसङ्कल्पयोर्यदुपादानमुत्पत्तिस्थितिनाशाय कारणं तत् तु सत् कालत्रयाबाध्यं ब्रह्मैव नान्यदित्यर्थः । अत एवाधिष्ठानज्ञाननिवर्त्त्याऽज्ञानकार्य्यत्वेन मिथ्याभूतमपि

अहमेकोऽपि सूक्ष्मश्च ज्ञाता साक्षी सदव्ययः।
तदहं नात्र सन्देहो विचारः सोऽयमीदृशः॥१६॥

जगत् यावज्ज्ञानोदयं रज्जुसर्पादिवत् संसारभयव्यवहारक्षमं भवेदिति भावः। ब्रह्मणः सत्त्वे हेतुः अव्ययमिति। अव्ययमपक्षयरहितं अनेनैतत् पूर्वभूता अपि जन्मादिविकारा निरस्ताः नाशश्च निरस्तः सद्भावविकाररहित्ये हेतुः। एकं सजातीयादिभेदशून्यं तद्धि कुतो न दृश्यते तत्राह सूक्ष्ममिति। सूक्ष्मं मनोवागादीन्द्रियागोचरं तेषां प्रवृत्तिनिमित्तं जातिक्रियादिशून्यत्वादित्यर्थः। ब्रह्मण उपादानत्वे दृष्टान्तमाह यथैवेति। यथैव मृत् घटादीनामुपादानं तथैवेत्यर्थः। एवम्प्रकारेण कार्य्यकारणभेदो नाममात्रमिति सूचितम्॥ १५॥

ननु यद्यपि कार्य्यकारणभेदो वाचारम्भणमात्रस्तथापि जीवब्रह्मणोर्भेदो वास्तवः स्यादित्याशङ्क्याह अहमिति। अत्र यत इत्यध्याहारस्तथाचायमर्थः यतोऽहमहंप्रत्ययवेद्योऽप्येकः सजातीयादिभेदशून्यो मनुष्यमात्रेऽप्यहं बुद्धेरेकत्वप्रतीतेरित्यर्थः। च पुनः सूक्ष्म इन्द्रियागोचरः पुनर्ज्ञाताऽहङ्कारादिप्रकाशकत्वेन चेतन इत्यर्थः। तथा साक्षी साक्षादिन्द्रियासन्निकर्षं विनैवेक्षते पश्यति प्रकाशयतीति साक्षी निर्विकार इत्यर्थः। अतएव सदव्ययः संश्चासावव्ययश्च विनाशापक्षयोपलक्षितसर्वविकारशून्य इत्यर्थः। यस्मादेवभूतोऽहं तत्तस्मादहमहंप्रत्ययवेद्यस्तत्सत्यज्ञानादिलक्षणं ब्रह्म अत्र सन्देहो नास्तीत्यर्थः सोऽयमीदृशो विचार इति॥ १६॥

आत्मा विनिष्कलोह्येको देहोबहुभिरावृतः।
तयोरैक्यम्प्रपश्यन्ति किमज्ञानमतः परम्॥ १७॥
आत्मा नियामकश्चान्तर्देहोवाह्यो नियम्यकः।
तयोरैक्यम्प्रपश्यन्ति किमज्ञानमतः परम्॥ १८॥

एतदेव जीवब्रह्मैक्यज्ञानप्रदर्शनेन दृढ़यति आत्मेत्यादि-पञ्चभिः। यतोऽहंप्रत्ययवेद्य आत्मा अतति सन्ततभावेन जाग्रदादिसर्वावस्थास्वनुवर्त्तत इत्यात्मा अवस्थात्रयभाव-साक्षित्वेन सत्यज्ञानादिस्वरूप इत्यर्थः। स त्वं पदलक्ष्यार्थो-ऽपि तत्पदलक्ष्यार्थ एव। विनिष्कलो विशेषणनिर्गतकलो निरवयव इत्यर्थः अन्यथा सावयवत्वे घटादिवद् विनाशि-त्वापत्तिरिति भावः। अत्रहेतुः एकः। ह्रीति एकमेवा-द्वितीयमित्यादि श्रुतिप्रसिद्धं द्योतयति। ननु तथा लिङ्ग-देहोऽप्यस्तीति चेन्नेत्याह देह इति। देहो लिङ्गदेहः सूक्ष्म-शरीरमिति यावत् स बहुभिः कलाभिः श्रोत्रादिबुद्ध्यन्ताभिः सप्तदशभिरावृत आच्छादितस्तत्सङ्घात इत्यर्थः। अतएव लिङ्गदेहस्य निरवयवत्वाद्यभावात् ज्ञानेन तत्कारणाज्ञाना-निवृत्तौ निवृत्तिरन्यथाऽनिर्मोक्षप्रसङ्ग इति भावः। एवमति वैलक्षण्ये सत्यपि तयोरात्मदेहयोः प्रकाशतमसोरिवैक्य-मैकात्म्यं प्रपश्यन्ति तार्किकादय इत्यर्थः। अतो विपरीत-दर्शनात्परमन्यदज्ञानं किमस्ति एतदेवाज्ञानमित्यर्थः विप-र्य्ययरूपकार्य्यान्यथानुपपत्त्या तत्कारणं मूलाऽज्ञानं कल्प्यत इति भावः॥ १७॥

पुनर्वैलक्षण्यमाह आत्मेति। आत्मा नियामको नियन्ता

आत्मा ज्ञानमयः पुण्यो देहोमांसमयोऽशुचिः।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥१९॥
आत्मा प्रकाशकः स्वच्छो देहस्तामस उच्यते।
तयोरैक्यं प्रपश्यन्ति किमज्ञानपतः परम् ॥२०॥
आत्मा नित्यो हि सद्रूपो देहोऽनित्योह्यसन्मयः।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥२१॥

च पुनः अन्तः पञ्चकोषान्तरः। देहस्तु नियम्यः सन् वाह्यः तयोरैक्यमित्युत्तरार्द्धं व्याख्यातं एवमग्रेऽपि ज्ञेयम् ॥ १८ ॥

अन्यदपि वैलक्षण्यमाह आत्मेति। आत्मा ज्ञानमयः प्रकाशस्वरूपोऽतएव पुण्यः शुद्धः देहस्तु मांसादिविकारवानत एवाऽशुचिः एतेनात्मनः स्थूलदेहादपि वैलक्षण्यमुक्तं भवति तयोरैक्यमित्यादि पूर्ववत् ॥ १९ ॥

वैलक्षण्यान्तरमाह आत्मेति। आत्मा स्वयं प्रकाशः सन् सूर्य्यादिवदन्यसर्वप्रकाशकोऽतएव स्वच्छः प्रकाश्यगुणदोषसम्बन्धशून्य इत्यर्थः। असङ्गोह्ययं पुरुषः इति श्रुतेः। देहस्तु तामसो घटादिवत् प्रकाश्यत्वेन जड़ः तयोरक्यमित्यादि पूर्ववत् ॥ २० ॥

अत सर्वत्र पौनरुक्तं नाशङ्कनीयमात्मनोऽलौकिकत्वेनात्यन्तदुर्बोधत्वादेव बहुधा वैलक्षण्यं प्रदर्श्यते परमकारुणिकैः श्रीमदाचार्य्यैः। आत्मेति। आत्मा नित्यो ध्वंसाप्रतियोगी अत्र हेतुः हि यस्मात् सद्रूपः अवाध्यस्वरूपः देहस्तु ध्वंसप्रतियोगी अत्रापि हेतुः हि यस्मादसन्मयोऽनित्यः

आत्मनस्तत्प्रकाशत्वं यत्पदार्थावभासनम् ।
नाग्न्यादिदीप्तिवद्दीप्तिर्भवत्यान्ध्यं यतोनिशि ॥२२॥

विकारित्वेन बाधयोग्य इत्यर्थः । यस्मादेवमात्मदेहयोरत्यन्त-वैलक्षण्यं तस्मात् तयोरैक्यदर्शनं केवलमज्ञानमिति ॥ २१ ॥

तत्वात्मनः प्रकाशकत्वं किं नामेत्यत आह आत्मन इति । आत्मनस्तत्प्रकाशत्वं बोद्धव्यं किन्तदित्यत आह यदिति । यत् पदार्थावभासनं घटपटादिवस्तु विषयप्रकाशः इदं तया निर्दिश्यमानविषयदर्शनमिति यावत् । तर्ह्यग्न्यादि-प्रकाशवद् विकारित्वं स्यादित्यत आह नाग्न्यादिदीप्तिवद् दीप्तिरिति । इयमात्मदीप्तिरग्न्यादिदीप्तिवन्न कदाचिदुत्पत्ति-विनाशादिविकारवतीत्यर्थः । तत्र हेतुमाह भवतीति । भवत्यान्ध्यं यतो निशि यतः कारणान्निशि रात्रावग्न्यादि-प्रकाश एकस्मिन् देशे सत्यपि तदन्यत्र लोकस्यान्ध्यं रूप-ग्रहाक्षमत्वं भवति नैवमात्मदीप्तिरेकत्र विद्यमाना चैकत्रा-ऽविद्यमाना परिच्छिन्ना चास्ति । किन्तु दीपादिरूपस्या-ग्न्यादिप्रकाशस्य प्रकाशिका तदभावे चान्धकारस्य प्रका-शिका उत्पत्तिनाशरहिता च सदा सर्वत्र पूर्णैवास्ति । यद्वा इयमात्मदीप्तिरग्न्यादिदीप्तिसदृशी न कुतः यतः कारणा-न्निशि रात्रावान्ध्यमन्धकारो भवत्यतस्तद्विलक्षणात्मदीप्ति-र्ज्ञेया । यद्यात्मदीप्तिरग्न्यादिदीप्तिसदृशी भवेत्तर्ह्यग्न्यादि-दीप्त्या यथान्धकारस्य नाशो भवति तथात्मदीप्त्याऽप्यन्धकारस्य नाशः स्यात् । परन्त्वात्मनः सत्ताप्रकाशाभ्यां सर्वत्र सर्वदा विद्यमानत्वेऽप्यन्धकारस्य नाशो न भवत्यत आत्मदीप्ति-

देहोऽहमित्ययं मूढो धृत्वा तिष्ठत्यहोजनः ।
ममायमित्यपि ज्ञात्वा घटद्रष्टेव सर्वदा ॥ २३ ॥
ब्रह्मैवाहं समः शान्तः सच्चिदानन्दलक्षणः ।
नाहं देहोह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २४ ॥

रग्न्यादिदीप्तिसदृशी न किन्तु इयमग्न्यादिदीप्तिर्भातीदमाभ्यं भातीत्याद्याकारे नाग्न्यादिदीप्तेरान्ध्यस्य चान्यस्य सर्वस्य च प्रकाशिका चाविरोधिन्यात्मदीप्तिः । स्वप्रकाशैवाभ्युपेतव्या सर्वैरात्मज्ञानारूढै रित्यर्थः तस्मादग्न्यादिदीप्तीनामपि दीपिकाऽन्यसाधननिरपेक्षा या दीप्तिः स आत्मप्रकाश इति भावः॥२२

तदेवं प्रकाश्यप्रकाशकत्वादिलक्षणवैलक्षण्ये सत्यपि आत्मानात्माभेददर्शिनमुपसंहरन्नुभयोर्भेदं स्पष्टयति देह इति । अहमहंशब्दप्रत्ययालम्बनः प्रत वसुर ऽयमिदन्तया निर्द्दिश्यमानो घटादिवत् प्रत्यक्षविषय्यसमानो देहोऽस्मीति उभयोर्द्दृष्टृदृश्ययोरैक्यं कृत्वा मूढः स्वाज्ञानकार्य्यविपर्य्ययमोहव्याप्तो जनस्तिष्ठति कृतकृत्यबुद्ध्या निर्व्यापारो भवतीत्यर्थः एतदहो महदज्ञानमिति भावः । किं कृत्वापीत्यत आह ममेति । मम मत्सम्बन्धी अयं देह इति सामान्यतो भेदं ज्ञात्वापि अतएवाश्चर्य्यमिति तात्पर्य्यम् । क इव सर्वदा घटद्रष्टेव यथा सर्वकाले द्रष्टा पुरुषो ममायं घट इति जानाति नत्वहं घट इति कदाचिदपि जानातीत्यर्थः ॥२३॥

नन्वेस्मिंस्तद् बुद्धिरिति लक्षणभ्रमापरपर्य्यायमोहकार्य्यलिङ्गानुमेयमज्ञानमीदृक् तर्हि तन्निवर्त्तकं किमित्याकाङ्क्षायां तद्विरोधित्वादात्मज्ञानमेवात्माऽज्ञाननिवर्त्तकमि-

निर्विकारो निराकारो निरवद्योऽहमव्ययः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २५ ॥

त्वभिप्रेत्य तल्लक्षणमाह ब्रह्मेत्यादिपञ्चभिः । अहमहंशब्दप्रत्ययालम्बनः प्रत्यगात्मा ब्रह्मैवास्मि । एतयोस्तत्त्वम्पदार्थयोरैक्ये हेतुगर्भितानि विशेषणान्याह सम इति । समः सत्ताप्रकाशाभ्यां सर्वाभिन्नः पुनः किं लक्षणः ज्ञातः निरस्तसमस्तोपाधित्वाद्विक्षेपादिविकारशून्यः पुनः किं लक्षणः सच्चिदानन्दलक्षणः । सच्चिदानन्दैरनृतजडदुःखप्रतियोगिभिर्लक्ष्यते विरुद्धांशत्यागरूपया भागलक्षणया ज्ञायत इति सच्चिदानन्दलक्षणः । ब्रह्मबोधे हि द्विविधं द्वारं विधिर्निषेधश्चेति तत्र सत्यज्ञानादिसाक्षाद्वाचकशब्दप्रयोगलक्षणो विधिरुक्तः इदानीमेतद्वियतः लक्षणो निषेधः प्रदर्श्यते नाहमिति । अहमहंशब्दा[illegible]सत्यपि अयं आत्मा देहो नेत्यन्वयः । देह इत्युपलक्षणं प्राणेन्द्रियादीनामपि । हीति । विद्वज्जनप्रसिद्धम् । देहादेरनात्मत्वे हेतुमाह असदिति । असद्रूपोऽसत् बाध्यमनृतत्वात्तद्रूपं स्वरूपं यस्य स तथाविधः इत्येवंप्रकारमहंब्रह्मास्मीत्यादिमहावाक्यजन्याऽखण्डाकारबुद्धिरूपं ज्ञानं बुधैरात्मतत्त्वज्ञैरुच्यते कथ्यत इत्यर्थः । एतद्विलक्षणः सर्वो ज्ञानाभास इति भावः ॥ २४ ॥

नन्वहं जातो मृतः सुखी दुःखीत्याद्यनेकविकारवत्त्वेनाहंशब्दप्रत्ययालम्बनस्य प्रतीयमानत्वात् कथं तस्य ब्रह्मत्वमित्यत आह निर्विकार इति । अहमहंशब्दप्रत्ययालम्बनः प्रत्यगात्मा निर्विकारोऽस्मीति शेषः । निर्गता विकारा जन्मा-

निरामयो निराभासो निर्विकल्पोऽहमाततः।
नाहं देहोह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥२६॥
निर्गुणो निष्क्रियो नित्यो नित्यमुक्तोऽहमच्युतः।
नाहं देहोह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २७ ॥

दयो यस्मात् स तथाविधः तेषां देहधर्मत्वादिति भावः। तत्र हेतुः निराकारः देहाद्याकाररहितः अतएव निरवद्यो वातपित्तादिजन्याध्यात्मिकादितापत्रयरहित इत्यर्थः। अतएवाऽव्ययः अपक्षयादिरहित इत्यर्थः। अहं मनुष्य इत्यादिप्रतीतेः कथं निर्विकारत्वमिति चेत् सा प्रतीतिः शुक्तिरजतादिवद्बाध्यत्वाद् भ्रान्तिरित्याह नाहमिति। नाहमित्युत्तरार्द्धं व्याख्यातं पूर्वश्लोके। एवमुत्तरत्रापि ज्ञेयं पुनरुक्तिस्तु ज्ञानप्रतिबन्धकस्य बुद्धिमान्द्यविपर्य्ययादेर्दार्ढ्यान्नाशङ्कनीया ॥ २५ ॥

पुनः किं लक्षणं ज्ञानमित्यत आह निरामय इति। अहं निरामयः सर्वरोगरहितः निराभासो वृत्तिव्याप्यत्वेति फलव्याप्यत्वशून्यः निर्विकल्पः कल्पनाहीनः आततश्च व्यापकः ॥ २६ ॥

पुनः किं लक्षणं ज्ञानमित्यत आह निर्गुण इति। अहं निर्गुणो गुणरहितः गुणानां मायामयत्वादित्यर्थः। अतएव निष्क्रियः क्रियारहितः। तथा नित्यो विनाशरहितः अतएव नित्यमुक्तः कालत्रयेऽपि बन्धशून्यः। अत्र हेतुः अच्युतः सच्चिदानन्दस्वभावः ॥ २७ ॥

निर्म्मलो निश्चलोऽनन्तः शुद्धोऽहमजरोऽमरः।
नाहं देहोह्यसद्रूपो ज्ञानमित्युच्यते बुधैः॥ २८॥
स्वदेहे शोभनं सन्तं पुरुषाख्यञ्च सम्मतम्।
किं मूर्ख शून्यमात्मानं देहातीतं करोषि भोः॥२९॥

पुनरपि ज्ञानलक्षणमाह निर्म्मल इति। अहं निर्म्मलः अविद्या तत्कार्य्यलक्षणमलरहितः अतएव निश्चलः व्यापकत्वादाकाशवन्निश्चल इत्यर्थः। निश्चलत्वे हेतुः अनन्तः देशकालवस्तुपरिच्छेदशून्यः। शुद्धः अशुद्धिरहितः पुनरजरः जरारहितः अमरो मरणरहितश्च सर्वधर्म्माणां देहत्रयवर्त्तित्वादिति भावः॥ २८॥

नन्वात्मा प्रत्यक्षदेहरूपो न भवति तर्हि शून्यत्वमात्मनः स्यादित्याशङ्काह स्वदेह इति। भो हे मूर्ख शून्यवादिन् स्वदेहे पुरुषाख्यं पुरि मनुष्यशरीरे उषति अहमाकारेण वसतीति पुरुष इत्याख्या नाम यस्य तम् अतएव शोभनं मङ्गलं शरीरविलक्षणत्वादतिमङ्गलम्। तथा सम्मतम् अयमात्मा ब्रह्मेत्यादिवाक्यनिर्णीतं चकारादुत्तमः पुरुषस्त्वन्य इत्यादि स्मृतिनिर्णीतं घटद्रष्टृत्वेन देहातीतमात्मानं सततं भावं सन्तं सर्वव्यवहाराधिष्ठानं शून्यं खपुष्पादिवत् अत्यन्ताऽभावरूपं किं करोषि कथं मन्यसे मासन्यथा इति भावः। क्वचित् स्वदेहमिति द्वितीयान्तः पाठस्तस्मिन् पक्षे देहात्मवाद्येव वदति उक्तलक्षणं मनुष्यदेहं त्यक्त्वा समानमन्यत्॥ २९॥

स्वात्मानं शृणु मूर्ख त्वं युक्त्या श्रुत्या च पूरुषम् ।
देहातीतं सदाकारं सुदुर्दर्शं भवादृशैः ॥ ३० ॥
अहंशब्देन विख्यात एक एव स्थितः परः ।
स्थूलस्त्वनेकतां प्राप्तः कथं स्याद्देहकः पुमान् ॥ ३१ ॥

ननु शून्यवादिन एवाभावापत्तेः शून्यं मास्तु परन्त्वात्मनो देहातीतत्वे प्रमाणाभावाद्देह एवात्मा स्यादित्याशङ्क्याह स्वात्मानमिति । भो मूर्ख देहात्मवादिन् चार्वाक त्वं स्वात्मानं स्वकीयमात्मानं पुरुषं देहातीतं देहातिरिक्तं श्रुत्या तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मेत्यादिकया । पुनर्युक्त्या च एकस्मिन् कर्त्तृकर्म्मविरोध इत्यादिरूपया शृणु अवधारय । देहातीतत्वे किमाकार आत्मेत्यत आह सदाकारमिति । सदाकारमस्तीत्यात्मव्यवहारकारणभूत आकारो यस्य तम् एवंविधोऽस्ति चेत् कुतो न दृश्यत इत्यत आह सुदुर्दर्शमिति । भवादृशैः श्रुत्याचार्य्यश्रद्धाशून्यैः सुदुर्दर्शं सर्वथादर्शनायोग्यं तस्य द्रष्टृपुरुषत्वादेवेत्यर्थः । यद्वा पूर्वश्लोकोक्तद्वितीयापेक्षया देहात्मवादिनः समाधानार्थोऽयं श्लोकः स्वात्मानमिति ॥ ३० ॥

Indira Gandhi National

तदेवाह अहमित्यादिसप्तभिः । परः देहादन्य आत्माऽहंशब्देन शब्द इत्युपलक्षणं प्रत्ययस्यापि विख्यातः प्रसिद्धः । किंलक्षण इत्यत आह एक इति । एक एव स्थित एवेति प्रत्येकमवधारणम् । तु शब्दः पूर्वोक्तादात्मनः स्थूलदेहस्य वैलक्षण्यद्योतकः स्थूलो देहकः देह एव देहकः स्वार्थे कः प्रत्ययः कथं पुमान् पुरुषः आत्मा स्यान्न कथञ्चिदित्यर्थः ।

अहं द्रष्टृतया सिद्धो देहोऽदृश्यतया स्थितः ।
ममायमितिनिर्देशात् कथं स्याद्देहकः पुमान् ॥३२॥
अहं विकारहीनस्तु देहोनित्यं विकारवान् ।
इति प्रतीयते साक्षात् कथं स्याद्देहकः पुमान् ॥३३॥
यस्मात् परमिति श्रुत्या तया पुरुषलक्षणम् ।

देहस्यानात्मत्वे हेतुमाह, अनेकतामिति । अनेकतां परस्परं भिन्नतां प्राप्तः एवं तमःप्रकाशवदतिविलक्षणत्वेऽपि देहस्यात्मत्वं ब्रुवन्नतिमूढत्वादुपेक्ष्य इति भावः ॥ ३१ ॥

तदेवाति वैलक्षण्यं दर्शयति अहमिति । अहमहंशब्दप्रत्ययालम्बन आत्मा द्रष्टृतया शब्दादिविषयप्रकाशकतया सिद्धः । शब्दं शृणोमीत्यादिव्यवहारेण प्रसिद्धः देहस्तु दृश्यतया शब्दादिवत् प्रकाश्यतया स्थितः । तत्र हेतुमाह ममेति । ममायं देह इति घटादिवत् स्वीयसम्बन्धितया निर्देशात् व्यवहारात् । एवमुभयोर्वैलक्षण्ये सति कथं देहकः पुमान् स्यादिति व्याख्यातार्थश्चतुर्थः पादः । एवमग्रेऽपि बोद्धव्यम् ॥ ३२ ॥

पुनर्वैलक्षण्यान्तरमाह अहमिति । अहं व्याख्यातार्थः विकारहीनः जायतेऽस्तीत्यादिषड्विकारहीनः । तु वैलक्षण्ये देहो नित्यं सर्वकालं विकारवान् । अत्र किं प्रमाणमत आह इतीति । इति साक्षात्प्रत्यक्षप्रमाणेन प्रतीयते अनुभूयते एवं सति कथं स्याद्देहकः पुमानिति ॥ ३३ ॥

एवं युक्त्या देहात्मनो वैलक्षण्यमुक्त्वा श्रुत्याप्याह यस्मा-

विनिर्णीतं विमूढेन कथं स्यादेहकः पुमान् ॥३४॥
सर्वं पुरुष एवेति सूक्ते पुरुषसंज्ञिते।
अप्युच्यते यतः श्रुत्या कथं स्यादेहकः पुमान् ।३५
असङ्गः पुरुषः प्रोक्तो बृहदारण्यकेऽपि च।
अनन्तमलसंश्लिष्टः कथं स्यादेहकः पुमान् ॥ ३६॥

दिति। यस्मात् परं नापरमस्ति किञ्चिद् यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् वृक्ष इव स्तब्धोदिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वमिति तया प्रसिद्धया तैत्तिरीयश्रुत्या। श्रुत्येति करणे तृतीया। पुरुषस्यात्मनो लक्षणं विमूढेन विगतमूढ़भावेनाति चतुरेण श्रुत्यर्थविवेचनकुशलेनेत्यर्थः। इयं कर्त्तरि तृतीया। विनिर्णीतं विचार्य्य स्थापितमन्यत् पूर्ववत्। यद्वा श्रुत्येति कर्तृपदम्, अस्मिन् पक्षे विमूढ़ेनेति देहात्मवादिनं प्रति सम्बोधनं विमूढ़ानामिन स्वामिन् मूर्खशिरोमणित्वादेव श्रुतिं नाद्रियस इति भावः॥ ३४॥

न केवलमनयैकया श्रुत्या विनिर्णीतं किं त्वन्ययापीत्याह सर्वमिति। यतो हेतोः श्रुत्या वेदाख्यपरदेवतया पुरुष एवेदं सर्वमिति पुरुषसंज्ञिते सूक्तेऽप्युच्यते पुरुषलक्षणमिति पूर्वश्लोकादध्याहारः अतः कथं स्यादिति पूर्ववत्॥ ३५॥

अपरयापि श्रुत्यैवमेव निर्णीतमित्याह असङ्ग इति। असङ्गो ह्ययं पुरुष इति श्रुत्या बृहदारण्यके वाजसनेयोपनिषदि पुरुषः असङ्गः प्रोक्तः देहकस्त्वनन्तमलसंश्लिष्टः कथं पुमान् स्यादिति॥ ३६॥

तत्रैव च समाख्यातः स्वयं ज्योतिर्हि पूरुषः ।
जड़ः परप्रकाश्योऽसौ कथं स्याद्देहकः पुमान् ॥३७॥
प्रोक्तोऽपि कर्म्मकाण्डेन ह्यात्मा देहाद्विलक्षणः ।
नित्यश्च तत्फलं भुङ्क्ते देहपातादनन्तरम् ॥३८॥
लिङ्गञ्चानेकसंयुक्तं चलं दृश्यं विकारि च ।
अव्यापकमसद्रूपं तत्कथं स्यात् पुमानयम् ॥ ३९ ॥

तत्रैवान्यप्रकारेणापि देहात्मनोर्वैलक्षण्यं निरूपितमित्याह । तत्रैवेति । तत्रैव बृहदारण्यक एवेत्यर्थः अत्रायं पुरुषः स्वयंज्योतिर्भवतीति श्रुत्या स्वयं ज्योतिः पुरुषः समाख्यातः । हीति विद्वत्प्रसिद्धिं द्योतयति असौ घटादिवद्दृश्योऽतएव परप्रकाश्यस्ततएव जड़ोदेहकः कथं पुमान् स्यादिति व्याख्यातम् ॥ ३७ ॥

Indira Gandhi National Centre for the Arts

अथास्तामिदं ज्ञानकाण्डं कर्म्मकाण्डेऽपि देहात्मनोर्भेद एव निर्णीत इत्याह प्रोक्त इति । हि यस्मात् कर्म्मकाण्डेनापि यावज्जीवमग्निहोत्रं जुहुयादित्यादिरूपेण कर्म्मप्रतिपादकेन वेदभागेनेत्यर्थः । आत्मा देहाद्विलक्षणः प्रोक्तः कथमित्यत आह नित्य इति । नित्यत्वञ्च कुत इत्यत आह तदिति । देहपातादनन्तरं तत्फलमनित्यं कर्म्मफलं यतः आत्मा भुङ्क्तेऽतो नित्य इत्यर्थः । चकारात् न्यायसांख्यादावप्येवमेव देहात्मनोर्भेदो वर्णित इति दर्शितम् ॥ ३८ ॥

नन्वेवं सति वेदान्तिनामपसिद्धान्तः स्यादित्यत आह लिङ्गमिति । लिङ्गं लिङ्गशरीरं तत्परोक्षादिधर्म्मविशिष्टमयं

एवं देहद्वयादन्य आत्मा पुरुष ईश्वरः।
सर्वात्मा सर्वरूपश्च सर्वातीतोऽहमव्ययम्॥ ४०॥

नित्यापरोक्षस्वभावः पुमान् कथं स्यान्न कथञ्चिदित्यर्थः चकारात् कारणशरीरमपि निराकृतमनयोरपि भेदे लिङ्गदेहस्य वैलक्षण्यसूचकानि विशेषणान्याह अनेकेति। अनेकसंयुक्तं देवमनुष्यादिनानास्थूलशरीरसम्बन्धयुक्तम्। यद्वा श्रोत्रादिबुद्ध्यन्तसप्तदशकलासंयुक्तं तथा चलं चञ्चलं मनःप्रधानत्वादित्यर्थः। पुनर्दृश्यं ममेदं श्रोत्रं ममेदं मन इत्यादि ममतास्पदत्वेनात्मन उपसर्जनभूतम्। च पुनर्विकारि उपचयादिमत् अव्यापकं परिच्छिन्नमसद्रूपमात्मज्ञानैकबाध्यञ्च। अत्रेदमाकूतं यथापि लिङ्गशरीराध्यासेनात्मनः कर्तृत्वभोक्तृत्वादिभावस्तथाप्यात्मनः स्वतस्तदभावज्ञानेनाऽध्यासनिवृत्तावकर्तृत्वाभोक्तृत्वादिभावसिद्धिरिति वेदान्तिनां न किञ्चिदपसिद्धान्तोन्यवर्त्तिइति मङ्गलम्॥ ३९॥

इदानीं पूर्वोक्तमर्थमुपसंहरति एवमिति। एवं पूर्वोक्तप्रकारेण देहद्वयात् स्थूलसूक्ष्मलक्षणादन्यो भिन्न आत्मा कोऽसावित्यत आह पुरुष इति। पुरुषः शरीराधिष्ठाता। तर्हि किं जीवः नेत्याह ईश्वर इति। तत्र हेतुः सर्वात्मेति तर्ह्यद्वैतहानिः स्यादित्यत आह सर्वातीत इति। एतादृश आत्मा चेदस्ति तर्हि कुतो नोपलभ्यत इत्यत आह अहमिति। अहं प्रत्यक्षोऽहंशब्दप्रत्ययालम्बनत्वेन सर्वदोपलब्धिस्वरूप इत्यर्थः। तर्ह्यहङ्कारः स्यान्नेत्याह अव्यय इति। अव्ययः अपक्षयादिविकारशून्यः अहङ्कारसाक्षीति भावः॥४०॥

इत्यात्मदेहभागेन प्रपञ्चस्यैव सत्यता।
यथोक्ता तर्कशास्त्रेण ततः किं पुरुषार्थता ॥४१॥
इत्यात्मदेहभेदेन देहात्मत्वं निवारितम्।
इदानीं देहभेदस्य ह्यसत्त्वं स्फुटमुच्यते ॥ ४२ ॥
चैतन्यस्यैकरूपत्वाद्भेदो युक्तो न कर्हिचित्।
जीवत्वञ्च मृषा ज्ञेयं रज्जौ सर्पग्रहो यथा ॥४३॥

अथेदानीमात्मनो देहद्वयातिरिक्तत्वप्रतिपादनमनर्थकमिति शङ्कते इतीति। इति पूर्वोक्तप्रकारेण वर्णितेनात्मदेहविभागेन प्रपञ्चस्यैव सत्यता तथोक्ता यथा तर्कशास्त्रेण ततः प्रपञ्चसत्यत्वप्रतिपादनात् किं पुरुषार्थता कुत्सितपुरुषार्थत्वं भयनिवृत्त्यभावादित्यर्थः। द्वितीयाद्वै भयं भवतीति श्रुतेः॥ ४१ ॥

भेदज्ञानस्याभेदज्ञानम्प्रति कारणत्वादात्मदेहविभागकथनं नानर्थकमित्याह इतीति। इति पूर्वोक्तेनात्मदेहभेदेनात्मनो देहात् पृथक्करणेन देहस्यैव प्राप्तं चार्वाकमतेनात्मत्वं तन्निवारितं इदानीमुत्तरग्रन्थेन तस्य देहभेदस्यासत्त्वमात्मसत्तातिरिक्तसत्ताराहित्यं स्फुटं स्पष्टं यथा स्यात् तथा हीति प्रसिद्धमुच्यते ॥ ४२ ॥

तदेवाह चैतन्यस्येति। चैतन्यस्य सर्वभूतभौतिकप्रपञ्चाधिष्ठानप्रकाशस्य घटः प्रकाशते पटः प्रकाशते इत्यादिष्वेकरूपत्वादेकाकारत्वाद्धेतोः कर्हिचित् कस्याञ्चिदवस्थायामपि भेदो न युक्तो न यथार्थ इत्यर्थः। तर्हि जीवभेदः

SANS 181.482 SHA

रज्ज्वज्ञानात् क्षणेनैव यद्वद्रज्जुर्हि सर्पिणी।
भाति तद्वच्चितिः साक्षाद्विश्वाकारेण केवला॥४४॥
उपादानं प्रपञ्चस्य ब्रह्मणोऽन्यन्न विद्यते।
तस्मात् सर्वप्रपञ्चोऽयं ब्रह्मैवास्ति न चेतरत्॥४५॥

सत्यः स्यादित्यत आह जीवत्वमिति। जीवत्वं चकारोऽप्यर्थः मृषा मिथ्या ज्ञेयं तदुपाधेरेवान्तःकरणादेर्मायामयत्वादित्यर्थः। अधिष्ठानसत्यत्वेन कल्पितस्य मिथ्यात्वबोधे दृष्टान्तमाह रज्जाविति। यथा रज्जौ तदज्ञानात् वक्रतादि साद्दश्येन मन्दान्धकारे सर्पबुद्धिरव्युत्पन्नस्य भवति न तु व्युत्पन्नस्य तथैवात्मन्यात्माज्ञानात् प्रकाश साद्दश्याद्विशेषप्रकाशे चिज्जड़ग्रन्थिरूपचिदाभासभ्रमो भवत्यविवेकिनां न तु विवेकिनामिति वेदान्तसिद्धान्तरहस्यम्॥४३॥

इदानीं पूर्वोक्तमेव दृष्टान्तं विवृण्वन् सर्वस्यापि प्रपञ्चस्य ब्रह्मरूपतामाह रज्ज्विति। केवलेति विशेषणेन पूर्वावस्थामपरित्यज्यावस्थान्तरप्राप्तिलक्षण-विवर्त्तोपादानत्वमेवोक्तम्। नारम्भोपादानत्वं नापि परिणामोपादानत्वमिति बोध्यमन्यत् स्पष्टम्॥४४॥

अत्र हेतुं दर्शयन् पूर्वोक्तमुपसंहरति उपादानमिति। यस्मात् प्रपञ्चस्याकाशादिदेहान्तस्य जगद्विस्तारस्य ब्रह्मणो मायाशवलाच्चैतन्यादन्यत् परमाणवो यद्वा प्रकृतिरुपादानं कारणविशेषो न विद्यत इति। तस्माद् वा एतस्मादात्मन आकाशः सम्भूत इत्यादिश्रुतेः तस्माद्धेतोरिति स्पष्टमन्यत्॥४५॥

IGNCA RAR ACC. No. R-475

व्याप्यव्यापकता मिथ्या सर्वमात्मेति शासनात् ।
इति ज्ञाते परे तत्त्वे भेदस्यावसरः कुतः ॥ ४६ ॥
श्रुत्या निवारितं नूनं नानात्वं स्वमुखेन हि ।
कथं भासो भवेदन्यः स्थिते चाद्वयकारणे ॥ ४७ ॥
दोषोऽपि विहितः श्रुत्या मृत्योर्मृत्युं स गच्छति ।
इह पश्यति नानात्वं मायया वञ्चितो नरः ॥ ४८ ॥

ननु व्याप्यव्यापकतारूपे भेदे जाग्रति सति कथं प्रपञ्चस्य ब्रह्मतेत्याशङ्क्याह व्याप्येति । व्याप्यमान्तरं व्यापकं बाह्यं तयोर्भावो मिथ्या घटाकाशादिवत् कल्पितत्वादसन्नित्यर्थः । तत्र प्रमाणमाह सर्वमिति । इदं ब्रह्मेदं क्षत्रमिति प्रक्रम्येदं सर्वं यदयमात्मेत्यादिश्रुतिरूपेश्वराज्ञाबलादित्यर्थः । ततः किमत आह इतीति । इति ज्ञातेत्यादि सुगमम् ॥ ४६ ॥

ननु प्रत्यक्षेण भासमानो व्याप्यव्यापकभावः कथं मिथ्येत्याशङ्क्याह श्रुत्येति । नूनमिति निश्चये हीति प्रसिद्धौ । श्रुत्या नेह नानास्ति किञ्चनेत्यादिरूपयेत्यर्थः । नानात्वं निवारितं तेन च नानात्वनिवारणेनाद्वयकारणेऽभिन्ननिमित्तोपादाने ब्रह्मणि स्थिते सति भासो व्याप्यव्यापकतादिप्रतिभासः कार्य्यभूतोऽन्यः स्वकारणातिरिक्तः कथं भवेन्न कथञ्चिदित्यर्थः ॥ ४७ ॥

किञ्च भेददृष्टेर्दोषश्रवणादपि कारणादभिन्नमेव कार्य्यमित्याह दोष इति । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीत्यादिरूपया श्रुत्येत्यर्थः । तत्र मृत्योरन्तरं मृत्युं जननमरणपरम्परामित्यर्थः । स्पष्टमन्यत् ॥ ४८ ॥

ब्रह्मणः सर्वभूतानि जायन्ते परमात्मनः।
तस्मादेतानि ब्रह्मैव भवन्तीत्यवधारयेत् ॥ ४९ ॥
ब्रह्मैव सर्वनामानि रूपाणि विविधानि च।
कर्म्माण्यपि समग्राणि बिभर्त्तीति श्रुतिर्जगौ ॥५०॥
सुवर्णाज्जायमानस्य सुवर्णत्वञ्च शाश्वतम्।
ब्रह्मणो जायमानस्य ब्रह्मत्वञ्च तथा भवेम् ॥ ५१ ॥

तर्हि किं कुर्य्यादित्यत आह ब्रह्मण इति। बृहत्त्वादपरिच्छिन्नत्वाद् ब्रह्म तद्रूपात् परमात्मनः सर्वाणि भूतानि जायन्ते उत्पाद्यन्ते। जायन्त इति स्थितिप्रलययोरप्युपलक्षणम्। यतो वा इमानि भूतानि जायन्त इत्यादि श्रुतेः। यस्मादेवं तस्माद्धेतोरेतानि भूतानि ब्रह्मैव भवन्ति सन्मात्रब्रह्मरूपाणीत्यवधारयेन्निश्चिनुयादिति ॥ ४९ ॥

ननु नानानामरूपकर्म्मभेदेन विचित्राणि भूतानि कथं ब्रह्मात्मकानीत्याशङ्क्याह ब्रह्मैवेति। त्रयं वा इदं नामरूपं कर्मेति बृहदारण्यकश्रुतिर्जगौ गायनं कृतवती। स्वाधिकारिणः श्रावयामासेत्यर्थः। किमित्यत आह ब्रह्मैव सर्वनामान्याकाशादिदेहान्तात् संज्ञाविशेषान् च पुनर्विविधानि रूपाण्यवकाशादिद्विपदान्तान् नानाविकारविशेषान् अपिशब्दस्यार्थे रूपग्रहणं गन्धादिग्रहणस्याप्युपलक्षणम्। समग्राणि कर्म्माण्यवकाशप्रदानादीनि स्नानशौचादीन् क्रियाविशेषानपि बिभर्त्ति रज्ज्वादिकमिव सर्पादिप्रतिभासं दधात्यधिष्ठानदर्शनशून्यान् प्रतिदर्शयतीत्यर्थः ॥ ५० ॥

स्वल्पमप्यन्तरं कृत्वा जीवात्मपरमात्मनोः।
यस्तिष्ठति स मूढात्मा भयन्तस्याभिभाषितम् ॥ ५२॥
यत्राज्ञानाद्भवेद् द्वैतमितरस्तत्र पश्यति।
आत्मत्वेन यदा सर्वं नेतरस्तत्र चाण्वपि ॥ ५३ ॥

अत्र लोकप्रसिद्धं दृष्टान्तमाह सुवर्णेति सुगमम् ॥ ५१ ॥

एवं कर्त्तृकर्मादिकारकषट्कस्यैकाधिष्ठानरूपत्वे सिद्धेऽपि भेददर्शिनोभयमाह स्वल्पेति। स्वल्पमप्यन्तरमुपास्योपासकरूपं भेदं कृत्वा कल्पयित्वा यस्तिष्ठति तस्य भयं भाषितम्। यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते। अथ तस्य भयं भवतीत्यादि श्रुतित्यर्थः ॥ ५२ ॥

ननु प्रकाशतमसोरिव परस्परविरुद्धस्वभावयोर्द्वैताद्वैतयोः कुत एकाधिकरणत्वमित्याशङ्क्यावस्थाभेदादित्याह यत्रेति। यत्र यस्यामज्ञानावस्थायां अज्ञाननेन द्वैतमिव भवेत्तत्र तस्यामज्ञानावस्थायामितरोऽन्योऽन्यत् पश्यति यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरं शृणोति तदितर इतरमभिवदति तदितर इतरं मनुते तदितर इतरं विजानातीति। यत्र वाऽन्यदिव स्यात्तत्रान्योऽन्यत् पश्येदन्योऽन्यज्जिघ्रेदन्योऽन्यद्रसयेदित्यादि श्रुतेः। चशब्दः पूर्वोक्ताद् वैलक्षण्यं सूचयति। यदा यस्मिन् ज्ञानकाले सर्वमात्मत्वेन भवेत् तत्र तस्मिन् ज्ञानकाले इतरोऽण्वपि किञ्चिदप्यन्यन्न पश्यति। यत्र वा अस्य सर्वमात्मैवाभूत्तत् केन कं पश्येत्तत् केन कं

यस्मिन् सर्वाणि भूतानि ह्यात्मत्वेन विजानतः।
न वै तस्य भवेन्मोहो न च शोकोऽद्वितीयतः ॥५४॥
अयमात्मा हि ब्रह्मैव सर्वात्मकतया स्थितः।
इति निर्द्धारितं श्रुत्या वृहदारण्यसंख्यया ॥ ५५ ॥
अनुभूतोऽप्ययं लोको व्यवहारक्षमोऽपि सन्।
असद्रूपो यथा स्वप्न उत्तरक्षणबाधतः ॥ ५६ ॥
स्वप्नोजागरणेऽलीकः स्वप्नेऽपि जागरो न हि।

जिघ्रेदित्यादि श्रुतिः। सकार्य्या ज्ञाननिवृत्त्या न द्वैतमिति भावः॥ ५३ ॥

ननु द्वैतादर्शने कः पुरुषार्थ इत्याशङ्क्य तत्प्रतिपादिकां यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र को मोहः कः शोक एकत्वमनुपश्यत इति श्रुतिमर्थतः पठति। यस्मिन्नवस्थाविशेषे सर्वाणि भूतान्यात्मत्वेनात्मभावेन विजानतः अपरोक्षेण साक्षात् कुर्वतोऽधिकारिणः पुरुषस्य तस्येति षष्ठी सप्तम्यर्थे। तस्मिन्नवस्थाविशेषे वै निश्चयेन मोहो भ्रमो न भवेच्च पुनः शोको व्याकुलतापि न भवेत्। उभयत्रहेतुः अद्वितीयतः तत्कारणाभावादित्यर्थः॥ ५४ ॥

शोककारणद्वैताभाने प्रमाणमाह अयमिति। स वा अयमात्मा ब्रह्मविज्ञानमय इत्यादिरूपयेत्यर्थः। शेषं स्पष्टम् ॥५५॥

नन्वयं लोक एव तत्कारणे सति कथं शोकाद्यभाव उच्यत इत्याशङ्क्य सदृष्टान्तमाह अनुभूत इति स्पष्टम्॥ ५६ ॥

दृष्टान्त' विवृण्वन्नुक्तन्यायमन्यत्राप्यतिदिशति सप्न इति।

इयमेव लये नास्ति लयोऽपि ह्युभयोर्न च ॥ ५७ ॥
त्रयमेव भवेन्मिथ्या गुणत्रयविनिर्म्मितम्।
अस्य द्रष्टा गुणातीतो नित्यो ह्येकश्चिदात्मकः ॥५८॥
यद्वन्मृदि घटभ्रान्तिं शुक्तौ वा रजतस्थितिम्।
तद्वद् ब्रह्मणि जीवत्वं वीक्षमाणे न पश्यति ॥५९॥
यथा मृदि घटोनाम कनके कुण्डलाभिधा।
शुक्तौ हि रजतख्यातिर्जीवशब्दस्तथापरे ॥ ६० ॥

अलीको मिथ्या इयं स्वप्नेजागरणे लये सुषुप्तौ शेषं स्पष्टम् ॥५७॥

उक्तमुपसंहरन् फलितमाह त्रयमिति। त्रयं जाग्रदाद्यवस्थात्रयमेवमुक्तपरम्परव्यभिचारेण मिथ्या। मिथ्यात्वे हेतुः गुणेति। गुणत्रयविनिर्मितं मायाकल्पितमित्यर्थः। तर्हि किं सत्यमत आह अस्येति। अस्य अवस्थात्रयस्य। शेषं स्पष्टम् ॥ ५८ ॥

नन्ववस्थात्रयं मिथ्या भवतु जीवस्तु सत्यः स्यादित्याशङ्क्य सदृष्टान्तमुत्तरमाह यद्वदिति। ब्रह्मणि वीक्ष्यमाणे आत्मत्वेन साक्षात् कृते सति जीवत्वं न पश्यतीत्यन्वयः। अन्यत् स्पष्टमेव ॥ ५९ ॥

अज्ञानावस्थायां प्रतीयमानो यो जीवब्रह्मभेदः स नाममात्र इति बहुदृष्टान्तैराह यथेति। रजतस्य ख्यातिराख्या नामेति यावत्। परे परे ब्रह्मणि जीवशब्दस्तथा शेषं स्पष्टम् ॥ ६० ॥

यथैव व्योम्नि नीलत्वं यथा नीरं मरुस्थले।
पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि ॥ ६१॥
यथैव शून्ये वैतालो गन्धर्वाणां पुरं यथा।
यथाकाशे द्विचन्द्रत्वं तद्वत् सत्ये जगत् स्थितिः॥६२॥
यथा तरङ्गकल्लोलैर्जलमेव स्फुरत्यलम्।
पात्ररूपेण ताम्रं हि ब्रह्माण्डौघैस्तथात्मता ॥ ६३॥
घटनाम्ना यथा पृथ्वी पटनाम्ना हि तन्तवः।
जगन्नाम्ना चिदाभाति ज्ञेयं तत्तदभावतः ॥ ६४ ॥

न केवलं जीव एव नाममात्रः किन्तु सर्वं विश्वमपि ब्रह्मणि नाममात्रमित्यनेकदृष्टान्तैराह यथैवेति। स्पष्टम् ॥६१॥

नाममात्रप्रपञ्चस्य मिथ्यात्ववासनादार्ढ्याये ममेवार्थं बहुभिर्लोकप्रसिद्धदृष्टान्तैः प्रपञ्चयति यथैव शून्य इत्यादि-त्रिभिः। शून्ये निर्जने देशे वैतालः अकस्मादाभासमानो भूतविशेषः। गन्धर्वपुरस्यापि शून्याधिष्ठानत्वं ज्ञेयं गन्धर्व-नगरं नाम राजनगराकारो नीलपीतादिमेघरचनाविशेषः स्पष्टमन्यत् ॥ ६२ ॥

यथा तरङ्गेति सुगमम् ॥ ६३ ॥

किञ्च घटेति। तत्र पादत्रयं स्पष्टम्। ननु किमनेन मिथ्यात्ववासनादार्ढ्येनेत्यत आह ज्ञेयमिति। तदभावतो नामाभावतस्तद्ब्रह्म ज्ञेयं वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादि श्रुतेः ॥ ६४ ॥

सर्वोऽपि व्यवहारस्तु ब्रह्मणा क्रियते जनैः।
अज्ञानान्न विजानन्ति मृदेव हि घटादिकम्॥ ६५॥
कार्य्यकारणता नित्यमास्ते घटमृदोर्यथा।
तथैव श्रुतियुक्तिभ्यां प्रपञ्चब्रह्मणोरिह॥ ६६॥
गृह्यमाणे घटे यद्वन् मृत्तिका याति वै बलात्।
वीक्षमाणे प्रपञ्चेऽपि ब्रह्मैवाभाति भासुरम्॥ ६७॥
सदैवात्मा विशुद्धोऽस्ति ह्यशुद्धो भाति वै यदा।
यथैव द्विविधा रज्जुर्ज्ञानिनोऽज्ञानिनोऽनिशम्॥ ६८

ननु यत्र हि द्वैतमिव भवतीत्यादि श्रुत्यर्थदर्शनेनावस्थात्रयविदेहमोक्षावुक्तौ न तु जीवन्मोक्षो इत्याशङ्क्याह सर्व इति। सर्वोऽपि लौकिको वैदिकश्चेति शेषं स्पष्टम्। अयं भावः अज्ञाननिवृत्तिरेव जीवन्मुक्तिर्न तु द्वैतादर्शनमिति॥ ६५॥

तत्र हेतुं सदृष्टान्तमाह कार्य्येति। सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादित्यादि श्रुतिः। युक्तिस्तु कार्य्यकारणयोरन्यत्वे एककारणज्ञानात् सर्वकार्य्यज्ञानं न स्यादित्यादि। सुगममन्यत्॥ ६६॥

कार्य्यकारणयोरन्यत्वमेव दृष्टान्तेन स्पष्टयति गृह्यमाण इति। भासुरं प्रमाणनिरपेक्षतयैव भासनशीलं स्पष्टमन्यत्॥ ६७॥

ननु ब्रह्मणि भासमाने प्रपञ्चो न भासेदित्याशङ्क्यावस्थाभेदेनोभयमपि भासत इति सदृष्टान्तमाह सदैवेति। तत्र ज्ञानिनः सदैवात्मा विशुद्धः अज्ञानतत्कार्य्यप्रपञ्चमलरहित-

यथैव मृण्मयः कुम्भस्तद्वद् देहोऽपि चिन्मयः।
आत्मनात्मविभागोऽयं मुधैव क्रियते बुधैः॥ ६९ ॥
सर्पत्वेन यथा रज्जू रजतत्वेन शुक्तिका।
विनिर्णीता विमूढेन देहत्वेन तथात्मता॥ ७० ॥
घटत्वेन यथा पृथ्वी पटत्वेनैव तन्तवः।
विनिर्णीता विमूढेन देहत्वेन तथात्मता॥ ७१ ॥
कनकं कुण्डलत्वेन तरङ्गत्वेन वै जलम्।
विनिर्णीता विमूढेन देहत्वेन तथात्मता॥ ७२ ॥

त्वान्निष्प्रपञ्चोऽस्ति अज्ञानिनस्तु सदैवाशुद्धोऽस्तीति भ्रमाद् विभाति। वै हीति तत्प्रसिद्धौ। उभयत्रापि दृष्टान्तः यथेति। यथा रज्जुर्ज्ञानिनः सर्पाभावतया निर्विषत्वेनाभयङ्करी अज्ञानिनस्तु सर्परूपतया विपरीतत्वेन भयङ्करीति द्विविधा भाति। अयं भावः ब्रह्म यद्यपि स्वयं प्रकाशत्वेन सदा भात्येव तथापि वृत्त्यारूढत्वेन पुरुषार्थोपयोगीति ज्ञानिनः प्रतिभाति नाज्ञानिनः सूर्यदीपादिरिव चक्षुष्मदन्धयोरितिति दिक्॥ ६८ ॥

नन्वात्मा यदि सदैव निष्प्रपञ्चत्वेन भाति नर्हि किमर्थं देहात्मभेदो वर्णित इत्याशङ्क्याविवेकिनो देहव्यतिरिक्तात्मबोधार्थं विवेकिनस्तु व्यर्थ एवेति सदृष्टान्तमाह यथेति। तत्राऽबुधैरित्यकारप्रश्लेषे मुधैव क्रियते अपि तु नेति काकुव्याख्यानम्। अन्यत् सर्वं सुगमम्॥ ६९ ॥

इदानीमविवेकिनः कल्पितदेहतादात्म्यं सदृष्टान्तमाह

पुरुषत्वे यथा स्थाणुर्जलत्वेन मरीचिका ।
विनिर्णीता विमूढेन देहत्वेन तथात्मता ॥ ७३ ॥
गृहत्वेनैव काष्ठानि खड्गत्वेनैव लोहता ।
विनिर्णीता विमूढेन देहत्वेन तथात्मता ॥ ७४ ॥
यथा वृक्षविपर्यासो जलाद्भवति कस्यचित् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७५ ॥
पोतेन गच्छतः पुंसः सर्वं भातीव चञ्चलम् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७६ ॥
पीतत्वं हि यथा [illegible] दोषाद्भवति कस्यचित् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७७ ॥
चक्षुर्भ्यां भ्रमशीलाभ्यां सर्वं भाति भ्रमात्मकम् ।
Gandhi National
Centre for the Arts
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७८ ॥
अलातं भ्रमणेनैव वर्त्तुलं भाति सूर्य्यवत् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७९ ॥

सर्पत्वेनेति । घटत्वेनेति । कनकमिति । पुरुषत्व इति । गृहत्वेनेति । पञ्चानामप्येतेषां श्लोकानामर्थः स्फुटतर एवास्त्यतो न व्याख्यानं कृतम् ॥७०॥७१॥७२॥७३॥७४॥

नन्वन्यथानिर्णये किं कारणमिति चेत्तदज्ञानमेवेति सदृष्टान्तमाह यथा वृक्षेत्यादि द्वादशभिः ॥ ७५ ॥

पोतेनेति पोतेन नौकया स्पष्टमन्यत् ॥ ७६ ॥

महत्त्वे सर्ववस्तूनामणुत्वं ह्यतिदूरतः।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः॥ ८०॥
सूक्ष्मत्वे सर्वभावानां स्थूलत्वञ्चोपनेत्रतः।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः॥ ८१॥
काचभूमौ जलत्वं वा जलभूमौ हि काचता।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः॥ ८२॥
यद्वदग्नौ मणित्वं हि मणौ वा वह्निता पुमान्।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः॥ ८३॥
अभ्रेषु सत्सु धावत्सु सोमो धावति भाति वै।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः॥ ८४॥
यथैव दिग्विपर्य्यासो मोहाद्भवति कस्यचित्।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः॥ ८५॥
यथा शशी जले भाति चञ्चलत्वेन कस्यचित्।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः॥ ८६॥

पीतत्वमिति। चक्षुर्भ्यामिति। अलातमिति। महत्त्व इति स्पष्टम्। ह्रीति सर्वलोकप्रसिद्धौ॥७७॥७८॥७९॥८०॥

सूक्ष्मत्वे इति। काचभूमाविति। यद्वदिति। अभ्रेष्विति। यथेति। यथा वृत्तेत्यादि श्लोकानां स्फुटार्थत्वात् पिष्टपेषण-तुल्यत्वेन न व्याख्यानं कृतम्॥८१॥८२॥८३॥८४॥८५॥

यथा शशीति शशीत्युपलक्षणं सूर्य्यादीनामपि शेषं स्पष्टम्॥ ८६॥

एवमात्मन्यविद्यातो देहाध्यासो हि जायते ।
स एवात्मपरिज्ञानाल्लीयते च परात्मनि ॥ ८७ ॥
सर्वमात्मतया ज्ञानं जगत् स्थावरजङ्गमम् ।
अभावात् सर्वभावानां देहस्य चात्मता कुतः॥८८॥
आत्मानं सततं जानन् कालं नय महाद्युते ।
प्रारब्धमखिलं भुञ्जन्नोद्वेगं कर्त्तुमर्हसि ॥ ८९ ॥

एवं द्वादशभिः श्लोकैरुक्तमर्थमुपसंहरति एवमिति । एवमुक्तेन प्रकारेणात्मन्यविद्यातः आत्मा ज्ञानात् देहाध्यासो मनुष्योऽहमित्यादिबुद्धिर्जायते भवति । हीति प्रसिद्धौ । नन्वेतस्य निवृत्तिः कुतो भवेदिति चेदात्मज्ञानादेवेत्याहोत्तरार्द्धेन स इति । स एव देहाध्यास एवात्मपरिज्ञानात् ब्रह्मात्मैक्यसाक्षात्कारात् परात्मनि अज्ञानतत्कार्य्यरहिते प्रत्यगभिन्ने ब्रह्मणि लीयते ब्रह्मस्वरूपेणावतिष्ठते । नह्यधिष्ठानं विनारोपितस्य स्वरूपमस्ति चकारादध्यासकारणमज्ञानमपि लीयत इति । अन्यथाऽध्यासलयाभावादित्यर्थः न हि कारणे सति कार्य्यस्य लयः सम्भवति । तस्मादात्मज्ञानादेव सकारणकार्य्याध्यासनिवृत्तिरित्यलं पल्लवितेन ॥८७॥

एतदेव विवृणोति सर्वमिति । आत्मता देहस्य नेत्यर्थः स्पष्टमन्यत् ॥ ८८ ॥

ननु ज्ञानितो निष्प्रपञ्चात्मतया मम किं स्यान्नह्यन्यभोजनेनान्यस्तृप्यतीति चेदत आह आत्मानमिति । भो महाद्युते कामादिपराभवेन स्वहितसाधनोन्मुखस्त्वं आत्मानं

उत्पन्नेऽप्यात्मविज्ञाने प्रारब्धं नैव मुञ्चति ।
इति यच्छ्रूयते शास्त्रे तन्निराक्रियतेऽधुना ॥९०॥
तत्त्वज्ञानोदयादूर्द्ध्वं प्रारब्धं नैव विद्यते ।
देहादीनामसत्त्वात्तु यथा स्वप्नो विबोधतः ॥९१॥
कर्म्म जन्मान्तरीयं यत् प्रारब्धमिति कीर्त्तितम् ।
तत्तु जन्मान्तराभावात् पुंसो नैवास्ति कर्हिचित् ॥९२॥

प्रत्यगभिन्नं सततं आसुप्तिमृतिपर्य्यन्तं जानन् वेदान्तवाक्यैर्विचारयन् कालं नय अतिक्रामस्व विचारसाध्यज्ञानानन्तरं चाखिलं प्रारब्धं चरमदेहारम्भकं कर्म्म भुञ्जन् सुखदुःखाभासानुभवेन क्षपयन् सनुद्वेगं कर्त्तुं नार्हसीत्यर्थः ॥८९॥

वस्तुतस्तु प्रारब्धमेव नास्ति कुतो भोगः भोगाभावे कुत उद्वेगकारणं तदभावे च कुतस्तरां तन्निषेधोपदेश इति वेदान्तसिद्धान्तरहस्यं वक्तुं प्रतिजानत आचार्य्याः उत्पन्न इति । अत्रेयं प्रक्रिया जगत्प्रतीतिस्त्रिधा लौकिकी शास्त्रीयानुभाविकी चेति । तत्राद्या पारमार्थिकी द्वितीयाऽपरमार्थिकी तृतीया तु प्रातिभासिकी । तासां निवृत्तिस्तु क्रमात् वेदान्तश्रवणादित्रयसाक्षात्कारप्रारब्धक्षयैर्भवति । नान्यथेति तत्रेयं प्रतिज्ञाऽन्यप्रतीत्यभिप्रायेणेति ज्ञातव्यं श्लोकार्थस्तु स्फुट एव ॥ ९० ॥

तदेवाह तत्त्वेति । ज्ञानेन सर्वव्यवहारकारणाज्ञाननिवृत्तौ प्रारब्धाभाव इति श्लोकार्थः । पदार्थस्तु स्फुट एव ॥९१॥

इदानिं प्रारब्धशब्दं व्युत्पादयन्नुक्तमुपसंहरति कर्म्मेति ।

स्वप्नदेहो यथाध्यस्तस्तथैवायं हि देहकः।
अध्यस्तस्य कुतो जन्म जन्माभावे हि तत् कुतः॥९३॥
उपादानं प्रपञ्चस्य मृद्भाण्डस्यैव दृश्यते।
अज्ञानञ्चैव वेदान्तैस्तस्मिन्नष्टे क्व विश्वता॥ ९४॥

तत्र कर्म्म त्रिविधं सञ्चितक्रियमाणप्रारब्धभेदात्। तन्मध्ये भाविदेहारम्भकं सञ्चितं तथा वर्त्तमानदेहनिर्वर्त्त्यं क्रियमाणं प्रारब्धन्तु वर्त्तमानदेहारम्भकम्। तत्र यद्यपि सञ्चितं जन्मान्तरीयमेव तथापि भाविदेहस्य तत्प्रारब्धमेव भवति तेनेदं सिद्धमात्मनः स्वतः कर्त्तृत्वाभवात् कालत्रयेऽपि जन्म नास्तीति सर्वमवदातम्॥ ९२॥

पूर्वोक्तं दृष्टान्तं विवृण्वन् सकारणजन्माभावे युक्तिमाह स्वमेति। जन्माभावे तत्प्रारब्धं कुतः स्पष्टमन्यत्॥ ९३॥

ननु देहादि प्रपञ्चस्य यतो वेत्यादिश्रुतेः सत्यब्रह्मजन्यत्वात् कथं प्रातिभासिकत्वमिति चेदुच्यते उपादानमिति। अत्र कारणं द्विविधं निमित्तोपादानभेदात् तत्र निमित्तं नामोत्पत्तिमात्रकारणं उपादानन्तु उत्पत्तिस्थितिलयकारणम्। तत्र वेदान्तैः मायान्तु प्रकृतिं विद्यादित्यादिभिः प्रपञ्चस्योपादानमज्ञानं पठ्यते चकाराद्ब्रह्मापि। अत्रायं भावः न केवलं ब्रह्मैव जगत् कारणं निर्विकारत्वात्। नापि केवलमज्ञानं जड़त्वात्। तस्मादुभयं मिलित्वैव जगत्कारणं भवतीति। सत्यानृते मिथुनीकरोतीत्यादि श्रुतेः। तत्र दृष्टान्तः भाण्डस्य घटशरावादेर्मृदिव मृत्पिण्ड इव। तत्र जलस्थाने

यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात्।
तद्वत् सत्यमविज्ञाय जगत् पश्यति मूढधीः ॥९५॥
रज्जुरूपे परिज्ञाते सर्पत्वन्तु न तिष्ठति।
अधिष्ठाने तथाज्ञाते प्रपञ्चः शून्यताङ्गतः॥ ९६ ॥
देहस्यापि प्रपञ्चत्वात् प्रारब्धावस्थितिः कुतः।
अज्ञानिजनबोधार्थं प्रारब्धं वक्ति वै श्रुतिः ॥९७॥

ब्रह्म पिण्डीकरणसामर्थ्यसाम्यादज्ञानन्तु मृत्तिकास्थाने आवरकत्वसाम्यात् तत्र ब्रह्मणोऽविनाभित्वाद् ब्रह्मज्ञानेन तस्मिन्नज्ञान एव नष्टे सति विश्वता जीवजगदीश्वरात्मकजगद्भावः क्व न क्वाप्यस्तीत्यर्थः ॥ ९४ ॥

मिथुनीभावस्यैव जगत्कारणत्वं सदृष्टान्तं प्रपञ्चयति यथा रज्जुमिति ॥ ९५ ॥

इदानीं यदुक्तं तस्मिन्नष्टे क्व विश्वतेति तत् प्रपञ्चयन् पूर्वोक्तं प्रारब्धाभावं सदृष्टान्तमुपसंहरति सार्द्धेन। रज्जुरूप इति स्पष्टम् ॥ ९६ ॥

किञ्च देहस्येति। ननु जीवन्मुक्तस्य ज्ञानिनः प्रारब्धाभावे सति अत्र ब्रह्मसम्भूत इत्यादि श्रुतिः प्रारब्धं किमर्थं वक्तीति चेदुच्यते अर्द्धेन अज्ञानीति। श्रुतिः अज्ञानिजनबोधार्थं प्रारब्धं वक्तीत्यर्थः। ज्ञानेन सर्वव्यवहारकारणेऽज्ञाने नष्टे सति ज्ञानिनः कथं व्यवहार इत्यज्ञानिभिराक्षिप्ते प्रारब्धादिति। तद्बोधार्थमिति। शेषं स्पष्टम् ॥ ९७ ॥

क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे ।
बहुत्वं तन्निषेधार्थं श्रुत्या गीतञ्च यत् स्फुटम् ॥९८
उच्यतेऽज्ञैर्बलाच्चैतत्तदानर्थद्वयागमः ।
वेदान्तमतहानञ्च यतो ज्ञानमिति श्रुतिः ॥९९॥

किं तर्हि ज्ञानिबोधार्थं वक्ति श्रुतिरिति चेदुच्यते क्षीयन्त इति । भिद्यन्ते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावर इति श्रुत्या कर्म्माणीति बहुत्वं यत् स्फुटं गीतं तत्तन्निषेधार्थं प्रारब्धाभावप्रतिपादनार्थम् । अन्यथा सञ्चितक्रियमाणापेक्षया कर्म्मणीति द्वित्वं गेयं तथा न गीतमतो ब्रह्मात्मसाक्षात्कारात् चिज्जड़ग्रन्थिभेदेन सञ्चित-क्रियमाणप्रारब्धाख्यत्रिविध-कर्म्मक्षयान्ते परमपुरुषार्थं ज्ञानिबोधार्थं श्रुतिर्वक्तीति भावः ॥ ९८ ॥

उक्त वैपरीत्ये बाधकमाह उच्यते इति । एतत् प्रारब्धमज्ञैः श्रुतितात्पर्य्यानभिज्ञैर्बलादविवेकसामर्थ्याच्चेदुच्यते । यथार्थतया प्रतिपाद्यते चकारादद्वयात्मानं न पश्यन्ति तदाऽनर्थद्वयागमो दोषद्वयप्राप्तिः । तत्र प्रारब्धरूपस्य द्वैतस्याङ्गीकारे अनिर्मोक्षप्रसङ्ग एको दोषः मोक्षाभावे ज्ञानसम्प्रदायोच्छेदरूपो द्वितीयो दोष इति । न केवलं दोषद्वयस्यैव प्राप्तिरपि तु वेदान्तमतहानञ्च वेदान्तमतस्याद्वैतस्य हानं त्यागो भविष्यति । प्रारब्धग्रहणरूपस्य द्वैतस्य यथार्थ्यादित्यर्थः । तर्हि किं प्रतिपत्तव्यमित्यत आह यत इति । यतो यस्याः सकाशात् ज्ञानं भवति तादृशी सा श्रुतिर्ग्राह्येति

त्रिपञ्चाङ्गान्यथो वक्ष्ये पूर्वोक्तस्य हि लब्धये।
तैश्च सर्वैः सदा कार्य्यं निदिध्यासनमेव तु ॥ १०० ॥

शेषः। सा श्रुतिस्तु "तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः। नानुध्यायाद् बहूञ्छब्दान् वाचोविग्लापनं हि तदिति।" एतदभिप्रायः क इति चेल्लिख्यते धीरो विवेकी ब्राह्मणो ब्रह्म भवितुमिच्छुस्तमेव वेदान्तप्रसिद्धमात्मानं विज्ञायादावुपदेशतः शास्त्रतश्च ज्ञात्वाऽनन्तरं प्रज्ञां शास्त्राचार्य्योपदिष्ट-विषयामपरोक्षानुभव-पर्य्यन्तां जिज्ञासापरिसमाप्तिकरीं कुर्वीत। बहून् कर्म्मोपासनाप्रतिपादकान् शब्दान् वाक्यसन्दर्भान्नानुध्यायान्न चिन्तयेत्। तर्हि तान् ब्रूयात् किं नेत्याह वाच इति। तदद्वैतशास्त्रपठनं वाचोविग्लापनं विशेषेण श्रमकरं हीति सर्वानुभवसिद्धमित्यलं पल्लवितेन ॥ ९९ ॥

तदेवमेतावता ग्रन्थसन्दर्भेण मुख्याधिकारिणो वैराग्यादिसाधनचतुष्टयपूर्वकं वेदान्तवाक्यविचार एव प्रत्यगभिन्न ब्रह्मापरोक्षज्ञानद्वारा मुख्यं मोक्षकारणमित्यभिहितं इदानीमसकृद्विचार्य्यापि बुद्धिमान्द्यविषयासक्त्यादिप्रतिबन्धेनापरोक्षज्ञानं यस्य न जायते तस्य मन्दाधिकारिणो निर्गुणब्रह्मोपासनमेव मुख्यं साधनमित्यभिप्रेत्य ससाधनं ध्यानयोगं प्रतिजानत आचार्य्याः त्रिपञ्चेति। अथो शब्दोऽधिकारिभेदार्थः। क्वचिदत इति पाठस्तस्मिन् पक्षे यतो मन्दाधिकारी विचारं न लभतेऽतो हेतोरित्यर्थः। त्रिपञ्च त्रिगुणितानि पञ्च पञ्चदशेत्यर्थः। तत् संख्याकान्यङ्गानि निदिध्या-

नित्याभ्यासादृते प्राप्तिर्न भवेत् सच्चिदात्मनः ।
तस्माद्ब्रह्म निदिध्यासेज्जिज्ञासुः श्रेयसे चिरम् १०१
यमो हि नियमस्त्यागो मौनं देशश्च कालता ।
आसनं मूलबन्धश्च देहसाम्यश्च दृक्स्थितिः ॥ १०२॥
प्राणसंयमनञ्चैव प्रत्याहारश्च धारणा ।
आत्मध्यानं समाधिश्च प्रोक्तान्यङ्गानि वै क्रमात् १०३
सर्वं ब्रह्मेति विज्ञानादिन्द्रियग्रामसंयमः ।

सनाङ्गिसाधकसाधनविशेषान् यज्ञसाधकप्रयाजादिवदित्यर्थः । वक्ष्ये वक्ष्यामि । तैर्वक्ष्यमाणैः सर्वैरङ्गैर्निदिध्यासनमेव कार्य्यं न तु तुष्णीमवस्थानमुचितमित्यर्थः । निदिध्यासनकर्त्तव्यप्रतिज्ञाप्रयोजनमाह पूर्वोक्तस्येति । पूर्वोक्तस्य स्वरूपावस्थानलक्षणमोक्षस्य सिद्धय इति । हीति वेदान्तप्रसिद्धौ तु शब्दः पातञ्जलवैलक्षण्यलक्षणेन मोक्षस्य सिद्धय इति । अनेनाष्टाङ्गप्रतिपादकं पातञ्जलमवैदिकत्वाद्वैशेषिकादिवदनादेयमिति ध्वनितम् ॥ १०० ॥

मन्दाधिकार्य्यन्यत् सर्वं कर्म्म सगुणोपासनविचाररूपं साधनञ्च विहाय श्रद्धयाचार्य्योक्तप्रकारेण निर्गुणं ब्रह्मैव निदिध्यासेदित्याह नित्येति स्पष्टम् ॥ १०१ ॥

ननु कानि तान्यङ्गानि यैः सह निदिध्यासनं कर्त्तव्यमित्यपेक्षायां तानि निर्द्दिशति यम इति द्वाभ्याम् । उक्तार्थावुभावपि श्लोकौ ॥ १०२ ॥ १०३ ॥

इदानीमेतेषां प्रत्येकं निर्द्देशक्रमेण स्वाभिमतानि लक्षणा-

यमोऽयमितिसंप्रोक्तोऽभ्यसनीयो मुहुर्मुहुः ॥१०४॥
सजातीयप्रवाहश्च विजातीयतिरस्कृतिः।
नियमो हि परानन्दो नियमात् क्रियते बुधैः ॥१०५॥

न्याह सर्वमित्याद्येकविंशत्या। तत्र प्रथमोद्दिष्टं यमन्तावद् दर्शयति सर्वमिति। सर्वमाकाशादिदेहान्तं जगद्ब्रह्म बाधसामानाधिकरण्यद्वारा स्थाणुपुरुषादिवदित्यर्थः इति। विज्ञानान्निश्चयाद्धेतोरिन्द्रियाणां श्रोत्रादीनामेकादशकरणानां ग्रामः समूहस्तस्य संयमः सम्यक् शब्दादिविषयाणां विनाशित्व सातिशयत्वदुःखदत्वादिदोषदर्शनात्। यमो विषयेभ्यो निवारणम् अयं यम इति सम्प्रोक्तः। न तु केवलमहिंसादिरित्यर्थः। ततश्च किमत आह अभ्यसनीय इति। अयं मुहुर्मुहुरभ्यसनीय इति॥ १०४ ॥

एवं यमं लक्षयित्वा नियमं लक्षयति सजातीयेति। सजातीयं प्रत्यगभिन्नं परंब्रह्म तदेकाकारोवृत्तिप्रवाहः। यद्वा सजातीयानामसङ्गोऽहमविक्रियोऽहमित्यादिप्रत्यगभिन्नब्रह्मप्रत्ययानां प्रवाहः। च पुनः विजातीयतिरस्कृतिर्विजातीयं ब्रह्मात्मविलक्षणं जगत् पूर्वसंस्काराज्जायमाना तदाकारावृत्तिरित्यर्थः। तस्य तिरस्कृतिर्दोषस्मृत्याऽधिकोपेक्षाऽनादर इत्यर्थः। अयं नियम इत्यर्थः। न तु केवलं शौचादिरित्यर्थः। हीत्युपनिषत् प्रसिद्धौ। नन्वनयोरुपनिषत् प्रसिद्धौ कः पुरुषार्थ इति चेदत आह परानन्द इति। ततश्च किमत आह नियमादित्यादि सुगमम्॥ १०५ ॥

त्यागः प्रपञ्चरूपस्य चिदात्मत्वावलोकनात्।
त्यागो हि महतां पूज्यः सद्यो मोक्षमयो यतः॥१०६
यस्माद्वाचो निवर्त्तन्ते अप्राप्य मनसा सह।
यन्मौनं योगिभिर्गम्यं तद्भवेत् सर्वदा बुधः॥१०७॥

इदानीं तृतीयं त्यागं लक्षयति त्याग इति। प्रपञ्च-रूपस्य प्रपञ्चोनाम रूपलक्षणो रूप्यते घटोऽयं पटोऽय-मित्यादिनामरूपतो निरूप्यते व्यवह्रियते प्रकाश्यते येन तत्प्रपञ्चरूपं सर्वाधिष्ठानभूतं पदार्थस्फुरणं तस्य चिदात्मत्वा-वलोकनाच्चिदजड़ं स्वत एव प्रकाशमानं ब्रह्म तदात्मा स्वरूपं यस्य तद्भावस्तस्यावलोकनमनुसन्धानं तस्माद्धेतोर्य-स्त्यागः नामरूपोपेक्षा स एव त्यागस्त्यागशब्दवाच्यः। इशावास्यमिदं सर्वमित्यादि श्रुतेः। हीति विद्वदनुभव-प्रसिद्धौ। नन्वयं त्यागो न कुत्रापि प्रसिद्ध इत्याशङ्क्याह महतां पूज्य इति। तत्र हेतुः सद्य इति। यतोऽयं त्यागः सद्योऽनुसन्धानकाल एव मोक्षमयः परमानन्दस्वरूपावस्थान-रूपः अतएवात्मतत्वविदामिष्टत्वादतिप्रसिद्धोऽयं त्याग इत्यर्थः। तस्मादयमेव मुमुक्षुणा कर्त्तव्यो नान्यः केवलस्वकर्म्माद्य-करणरूप इति भावः एवमग्रेऽप्यूह्यम्॥ १०६॥

अथ मौनं लक्षयति यस्मादिति। शब्दप्रवृत्तिनिमित्त-जातिक्रियादेरभावात् मनोवाचामगोचरं यन्मौनं वक्तु-मशक्यं यद्ब्रह्म तथापि योगिभिर्गम्यम् ज्ञानयोगिभिः प्रत्यगभिन्नत्वेन प्राप्यं तत्प्रसिद्धमेव ब्रह्मरूपं मौनम्। सर्वदा बुधो विवेकी भवेत्तदहमस्मीत्यनुसन्दध्यादित्यर्थः॥ १०७॥

वाचो यस्मान्निवर्त्तन्ते तद्वक्तुं केन शक्यते।
प्रपञ्चो यदि वक्तव्यः सोऽपि शब्दविवर्जितः ॥१०८॥
इति वा तद्भवेन्मौनं सतां सहजसंज्ञितम्।
गिरा मौनन्तु बालानां प्रयुक्तं ब्रह्मवादिभिः ॥१०९॥
आदावन्ते च मध्ये च जनो यस्मिन्न विद्यते।
येनेदं सततं व्याप्तं सदेशो विजनः स्मृतः ॥११०॥
कलनात् सर्वभूतानां ब्रह्मादीनां निमेषतः।

नन्विदं प्रत्यगभिन्नब्रह्मानुसन्धानं ध्यानरूपं चतुर्दशमङ्गं प्रतीयते इत्यादिशङ्का स्वारस्यात् प्रकाशान्तरेण मौनमेव लक्षयति सार्द्धेन वाच इति। अयं भावः शब्दप्रवृत्तिनिमित्ताभावाद्ब्रह्म यथा वागविषयं तथा नामरूपजात्यादिप्रपञ्चोऽपि सदसदादिविकल्पासहत्वाद्वागतीतः ॥ १०८ ॥

इतीति। इत्युक्तप्रकारेण ब्रह्म जगतोर्विवादत्यागरूपं वा तन्मौनं भवेत्। केषामित्याकाङ्क्षायां सताञ्चेदं प्रसिद्धमित्याह सतामिति। सत्पुरुषाणां सहजस्थितिनाम्ना प्रसिद्धमित्यर्थः। ननु वाङ्नियमनमेव प्रसिद्धं मौनमिति चेदत आहार्द्धेन गिरेति ॥ १०९ ॥

इदानीं देशं लक्षयति आदाविति। अत्र जनस्य त्रैकालिकाभाव आनुभविकः स्वप्रतीत्या ज्ञेयः। न तु लौकिकशास्त्रीयप्रतीतिभ्यां विरोधादिति भावः। स्पष्टमन्यत् ॥ ११० ॥

कालशब्देन निर्दिष्टो ह्यखण्डानन्द अद्वयः॥१११॥
सुखेनैव भवेद् यस्मिन्नजस्रं ब्रह्मचिन्तनम्।
आसनं तद्विजानीयान्नेतरत् सुखनाशनम्॥११२॥
सिद्धं यत् सर्वभूतानि विश्वाधिष्ठानमव्ययम्।
यस्मिन् सिद्धाः समाविष्टास्तद्वै सिद्धासनं विदुः ११३
यन्मूलं सर्वभूतानां यन्मूलं चित्तबन्धनम्।
मूलबन्धः सदा सेव्यो योग्योऽसौ राजयोगिनाम् ११४

अथ कालं लक्षयति कलनादिति। निमेषत आरभ्य कलनात् सर्गस्थितिप्रलयाधारत्वादित्यर्थः। शेषं स्पष्टम्॥१११॥

आसनं लक्षयति सुखेनैवेति। यस्मिन् सुखे सुखरूपे ब्रह्मणि चिन्तनं कर्त्तव्याकर्त्तव्यचिन्ता नैव भवेत् तद् ब्रह्मासनं विजानीयादित्यन्वयः। कीदृशं ब्रह्म अजस्रं कालत्रयावस्थायीत्यर्थः। सुगममन्यत्॥११२॥

प्रसङ्गादासनविशेषं लक्षयति सिद्धमिति। सिद्धञ्च तदासनञ्चाथवा सिद्धानामासनं सिद्धासनमिति कर्मधारयतत्पुरुषाभ्यां ब्रह्मैवेत्यर्थः॥११३॥

अथ मूलबन्धं लक्षयति यन्मूलमिति। आकाशादिसर्वभूतानां यन्मूलमादिकारणं ब्रह्म तथा चित्तबन्धनं चित्तस्य बन्धकारणं मूलाज्ञानं तदपि यन्मूलं यदाश्रयं पृथक् सत्ताशून्यत्वादिति। यद्वा चित्तस्य बन्धनं एकत्र लक्ष्ये निग्रहस्तदपि यन्मूलं यस्य ब्रह्मणः प्राप्तिनिमित्तमित्यर्थः स मूलबन्ध इत्यन्वयः। राजयोगिनां व्यवहारेऽप्यविक्षिप्तचित्तता-

अङ्गानां समतां विद्यात् समे ब्रह्मणि लीयते।
नो चेन्नैव समानत्वमृजुत्वं शुष्कवृक्षवत् ॥११५॥
दृष्टिं ज्ञानमयीं कृत्वा पश्येद् ब्रह्ममयं जगत्।
सा दृष्टिः परमोदारा न नासाग्रावलोकिनी ॥११६॥
दृष्टिदर्शनदृश्यानां विरामो यत्र वा भवेत्।
दृष्टिस्तत्रैव कर्त्तव्या न नासाग्रावलोकिनी ॥११७॥

लक्षणो राजयोगस्तद्वतां ज्ञानपरिपाकयुक्तानामित्यर्थः। शेषं स्पष्टम् ॥ ११४ ॥

इदानीं देहसाम्यं लक्षयति अङ्गानामिति। अङ्गानां ब्रह्मण्यध्यस्तानां स्वभावविषमाणामधिष्ठानसमत्वदृष्ट्या समतां विद्याज्जानीयात् चेत् समे ब्रह्मणि अङ्गवैषम्यमित्यत्राध्याहारः तच्चेन्नो लीयते समब्रह्मरूपतया न तिष्ठतीत्यर्थः। तर्हीत्यत्र शेषः। शुष्कवृक्षवदङ्गाना मृजुत्वं सरलत्वमचञ्चलत्वञ्च यत्तत् समानत्वं नैव भवेदिति सम्बन्धः। अङ्गानां विषमस्वभावत्वादिति भावः ॥ ११५ ॥

इदानीं दृक्स्थितिं लक्षयति दृष्टिमिति। ब्रह्मणि फलव्याप्यत्वाभावेऽपि वृत्तिव्याप्यत्वात् दृष्टिमन्तःकरणवृत्तिं ज्ञानमयीमखण्डब्रह्माकारां कृत्वा जगत् सर्वं ब्रह्ममयं पश्येत् ब्रह्मैवेदं सर्वमित्येतावन्मात्रैव वृत्तिः कार्य्येति भावः स्पष्टमन्यत् ॥ ११६ ॥

ननु तथापि ब्रह्मणि वृत्तिप्रवृत्तिनिमित्तजात्याद्यभावादिन्द्रियादिप्रत्यक्षविषयस्य जगतो ब्रह्मरूपत्वेन दर्शनं कथं

चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात्।
निरोधः सर्ववृत्तीनां प्राणायामः स उच्यते ॥११८॥
निषेधनं प्रपञ्चस्य रेचकाख्यः समीरणः।
ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरीरितः ॥११९
ततस्तद्वृत्तिनैश्चल्यं कुम्भकः प्राणसंयमः।
अयञ्चापि प्रबुद्धानामज्ञानां घ्राणपीड़नम् ॥१२०॥

स्यादित्याशङ्क्य स्वारस्यात् पक्षान्तरेणाह दृष्टीति। वा शब्दः पक्षान्तरे। दृष्टीत्यादिना श्रोत्रादिसर्वत्रिपुटीनामुपलक्षणं यत्र यस्मिन् ब्रह्म स्वरूपे द्रष्ट्रादिसर्वत्रिपुटीनां विरामो लयो भवेत्तत्र तस्मिन्नेव प्रपश्यतीति दृष्टिरन्तःकरणवृत्तिः कर्त्तव्या न नासिकाग्रावलोकिनीत्यर्थः ॥११७॥

अथ प्राणायामं लक्षयति चित्तादिति। मनोऽधीनत्वात् प्राणस्य मनोनिरोधः न तु प्राणनिरोधेनैव पातञ्जलाभिमतेन मनोनिरोधस्तदधीनत्वाभावादिति फलितार्थः ॥११८॥

अमुं प्राणायामं स्वाभिमतेन रेचकादिविभागत्रयेण लक्षयति सार्द्धेन निषेधनमिति स्पष्टम् ॥११९॥

तत इति। अनात्मोपेक्षात्मानुसन्धान तद्दार्ढ्यानि रेचकादिशब्दवाच्यानीति भावार्थः। नन्वयं त्रिविधोऽपि प्राणायामो न कुत्रापि श्रुत इत्यपेक्षायामत्राधिकारिणमाहार्द्धेन अयमिति। अयमुक्तलक्षणः प्राणायामस्त्रकाराङ्गैदक्षययुक्त इत्यर्थः। प्रबुद्धानां प्रकर्षेणासम्भावनादिरहितत्वेन बुद्धानामात्मबोधयुक्तानां निःसन्देहापरोक्षज्ञानिनामित्यर्थः।

विषयेष्वात्मतां दृष्ट्वा मनसश्चिति मज्जनम् ।
प्रत्याहारः स विज्ञेयोऽभ्यसनीयो मुमुक्षुभिः ॥१२१॥
यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात् ।
मनसो धारणञ्चैव धारणा सा परा मता ॥१२२॥
ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिः ।

योऽस्य इत्यध्याहारः तत्र्यज्ञानां कीदृश इत्यत आह अज्ञाना-मिति ॥ १२० ॥

इदानीं प्रत्याहारं लक्षयति विषयेष्विति । विषयेषु यद्वा शब्दादिषु अन्वयव्यतिरेकाभ्यामात्मतां सत्तास्फुरत्वा-प्रियतामात्रतां दृष्ट्वानुसन्धाय मनसोऽन्तःकरणस्य चिति मज्जनं नामरूपक्रियानुसन्धानराहित्येन चित्स्वरूपतयाव-स्थानं सप्रत्याहारः । ततः किमत आह अभ्यसनीय इति ॥ १२१ ॥

धारणां लक्षयति यत्रेति । यत्र यत्र यस्मिन् यस्मिन् पदार्थे मनो याति गच्छति तत्र तत्र ब्रह्मणः सत्तादिमात्रस्य नामाद्युपेक्षया दर्शनादनुसन्धानान्मनसो धारणं ब्रह्मण्येव स्थिरीकरणं धारणेत्यर्थः । नन्वाधारादिषट्चक्रमध्ये एकत्र मनसो धारणं धारणेति प्रसिद्धमत आह सेति । सा अत्रोक्तलक्षणा धारणा परोत्कृष्टा मता तत्त्वबोधवतामित्यर्थः । अन्या तु पातञ्जलाभिमता प्राणायामादिवदपरेति भावः । च एवेत्यव्ययद्वयं वेदान्तविद्वदनुभवप्रसिद्धिं द्योतयति ॥१२२॥

अथात्मध्यानं लक्षयति ब्रह्मैवेति । सद्वृत्त्या सती

ध्यानशब्देन विख्याता परमानन्ददायिनी ॥ १२३॥

निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः।
वृत्तिविस्मरणं सम्यक् समाधिर्ज्ञानसंज्ञकः ॥ १२४॥

इमञ्चाकृत्रिममानन्दं तावत् साधु समाभ्यसेत्।
वश्यो यावत् क्षणात् पुंसः प्रयुक्तः सन् भवेत्स्वयम् १२५

प्रमाणान्तरबाधायोग्या वृत्तिस्तया वृत्त्या निरालम्बतया देहाद्यनुसन्धानराहित्येन स्थितिरवस्थानमित्यर्थः। शेषं स्पष्टम् ॥ १२३ ॥

अथान्त्यं समाधिरूपं पञ्चदशमङ्गं लक्षयति निर्विकारतयेति। निर्विकारतया विषयानुसन्धानरहिततयान्तःकरणवृत्त्याः पुनरनन्तरमेव ब्रह्माकारतया यत् सम्यक् प्रपञ्चसंस्काररहितं ध्यातृध्यानध्येयाकारवृत्तिशून्यं वृत्तिविस्मरणं द्वैताननुसन्धानं सा समाधिः पञ्चदशाङ्गमित्यर्थः। ननु वृत्तिविस्मरणस्याज्ञानरूपत्वात् कथं समाधित्वमित्याशङ्क्य ब्रह्मात्मैक्यबोधाभावे केवलवृत्तिविस्मरणस्य तथात्वेऽपि न ब्रह्मज्ञानसहितस्य तथात्वमित्याशयेन समाधिं विशिनष्टि ज्ञानसंज्ञक इति। ज्ञानमिति संज्ञा यस्य स ज्ञानसंज्ञकः ब्रह्माकारतया स्फुरणरूप इत्यर्थः। उक्तञ्च समाधिः संविदुत्पत्तिः परजीवैकतां प्रतीति ॥ १२४ ॥

इदानीं यदर्थं साङ्गमिदं निदिध्यासनमुक्तं तदाह इममिति। अकृत्रिमानन्दं स्वरूपभूतानन्दाभिव्यञ्जकं निदिध्यासनमित्यर्थः। चकाराद् यथा बुद्धिवेदान्तविचारमपीति। स्पष्टमन्यत् ॥ १२५ ॥

ततः साधननिर्मुक्तः सिद्धो भवति योगिराट्।
तत् स्वरूपं न चैतस्य विषयो मनसो गिराम्॥१२६॥
समाधौ क्रियमाणे तु विघ्नान्यायान्ति वै बलात्।
अनुसन्धानराहित्यमालस्यं भोगलालसम्॥१२७॥
लयस्तमश्च विक्षेपो रसास्वादश्च शून्यता।
एवं यद्विघ्नबाहुल्यं त्याज्यं ब्रह्मविदा शनैः॥१२८॥
भाववृत्त्या हि भावत्वं शून्यवृत्त्या हि शून्यता।
ब्रह्मवृत्त्या हि पूर्णत्वं तथा पूर्णत्वमभ्यसेत्॥१२९॥

एवमभ्यसतः फलमाह तत इति। साधननिर्मुक्तः साधनाभ्यासरहित इत्यर्थः। एतस्य योगिनः तद्वेदान्तप्रसिद्धं स्वरूपं ब्रह्मैवेति भावः॥१२६॥

अखण्डैकरसब्रह्मस्वरूपत्वेनावस्थानलक्षणमोक्षफलदोऽयं समाधिपर्य्यन्तो योगो गुर्वनुग्रहवतां सुकरोऽस्ति तथापि सुकर इत्यनादरो न कार्य्यः। विघ्नबाहुल्यसम्भवादित्याह द्वाभ्यां समाधाविति स्पष्टोऽर्थः॥१२७॥

लय इति। तत्र लयो निद्रा तमः कार्य्याकार्य्याऽविवेकः विक्षेपो विषयस्फुरणं रसास्वादो धन्योऽहमित्याद्यानन्दाकारावृत्तिः च पुनः शून्यता चित्तदोषः रागद्वेषादितीव्रवासनया चित्तस्य स्तब्धीभावः कषायः क्षुभ्यतीत्यर्थः। स्पष्टमन्यत्॥१२८॥

वृत्तिरेव बन्धमोक्षकारणमित्याह भावेति। भाववृत्त्या घटाद्याकारवृत्त्या भावत्वं तन्मयत्वं भवतीति शेषः। शून्य-

ये हि वृत्तिं जहत्येनां ब्रह्माख्यां पावनीं पराम् ।
ते तु वृथैव जीवन्ति पशुभिश्च समा नराः ॥१३०॥
ये हि वृत्तिं विजानन्ति ज्ञात्वापि वर्द्धयन्ति ये ।
ते वै सत्पुरुषा धन्या वन्द्यास्ते भुवनत्रये ॥ १३१ ॥
येषां वृत्तिः समावृद्धा परिपक्वा च सा पुनः ।
ते वै सद्ब्रह्मतां प्राप्ता नेतरे शब्दवादिनः ॥१३२॥
कुशला ब्रह्मवार्त्तायां वृत्तिहीनाः सुरागिणः ।
तेप्यज्ञानितया नूनं पुनरायान्ति यान्ति च ॥१३३॥
निमेषार्द्धं न तिष्ठन्ति वृत्तिं ब्रह्ममयीं विना ।

वृत्त्या अभाववृत्त्या शून्यता जड़तेत्यर्थः । हीति लोकप्रसिद्धौ तथा ब्रह्माकारवृत्त्या पूर्णत्वं हीति विद्वत् प्रसिद्धौ ततः किमत आह पूर्णत्वमिति ॥ १२९ ॥

इदानीं ब्रह्ममयीं वृत्तिं स्तोतुं तद्वृत्तित्यागपरान्निन्दति ये हीति । ये एनां ब्रह्माख्यां वृत्तिं जहति त्यजन्ति ते तु वृथैव जीवन्तीत्यन्वयः । स्पष्टमन्यत् ॥ १३० ॥

सम्प्रति तामेव वृत्तिं विवर्द्धयितुं ब्रह्मवृत्तिपरान् सत्पुरुषान् स्तौति ये हीति स्पष्टम् ॥ १३१ ॥

एवं ब्रह्मवृत्तिपरान् स्तुत्वाऽधुना तेषां ब्रह्मप्राप्तिरूपं फलमाह तेषामिति । सुगमम् ॥ १३२ ॥

तानेव शब्दवादिनो निन्दति कुशला इति। स्पष्टम् ॥१३३॥

यत एवं तस्माद् ब्रह्मनिष्ठैर्ब्रह्मवृत्त्यैव सर्वदा स्थातव्यमिति सूचयितुं ब्रह्मादीनामुदाहरणमाह निमेषेति । यथा

यथा तिष्ठन्ति ब्रह्माद्याः सनकाद्याः शुकादयः॥१३४॥
कार्य्ये कारणता याता कारणे न हि कार्य्यता ।
कारणत्वं ततो गच्छेत् कार्य्याभावे विचारतः॥१३५॥
अथ शुद्धं भवेद्वस्तु यद्वै वाचामगोचरम् ।
द्रष्टव्यं मृद्घटेनैव दृष्टान्तेन पुनः पुनः ॥ १३६ ॥

ब्रह्माद्यास्तथा सनकाद्याः यथा सनकाद्यास्तथा शुकाद्या इति सम्प्रदायो दर्शितः । एतेन ब्रह्मादिसेव्यत्वादतिश्रेष्ठोऽयं समाधिपर्य्यन्तो राजयोगः सर्व्वदा मुमुक्षुभिः सेवनीय इति ध्वनितम् ॥ १३४ ॥

तदेवं स्वाभिमतं साङ्गं राजयोगमभिधाय पूर्वोपक्रान्तसांख्यापरपर्य्यायं वेदान्तविचारमुपसंहरति कार्य्ये इत्यादिपञ्चभिः श्लोकैः । कार्य्ये इति कार्य्ये घटपटादिरूपे विकारे कारणता मृत्तन्त्वादिरूपा सर्व्वविकाराधिष्ठानता आयाताऽनुगता कारणे तु कार्य्यता न हीति प्रसिद्धम् । ततः कारणात् कार्य्याभावे कारणत्वं गच्छेत् । ननु कथं कारणे कार्य्याभाव इत्यत आह विचारत इति । यथायं दृष्टान्तस्तथाकाशादिकार्य्ये कारणता आकाशोऽस्ति भातीत्यादिव्यवहारहेतुभूता सत्यज्ञानादिरूपब्रह्मणः कारणता आयाता कारणे ब्रह्मणि तु आकाशादिकार्य्यता न हीति । अतः परमार्थतः आकाशाद्यभावे ब्रह्मणः कारणतापि न हीति दार्ष्टान्तिकोऽर्थः ॥ १३५ ॥

ततः किमत आह अथेति । अथानन्तरं कार्य्यकारण-

अनेनैव प्रकारेण वृत्तिर्ब्रह्मात्मिका भवेत् ।
उदेति शुद्धचित्तानां वृत्तिज्ञानं ततःपरम् ॥ १३७॥
कारणं व्यतिरेकेण पुमानादौ विलोकयेत् ।
अन्वयेन पुनस्तद्धि कार्य्यं नित्यं प्रपश्यति ॥ १३८॥
कार्य्ये हि कारणं पश्येत् पश्चात् कार्य्यं विसर्जयेत् ।
कारणत्वं ततो गच्छेदवशिष्टं भवेन्मुनिः ॥ १३९ ॥

भावनिवृत्तौ यच्छुद्धं मनोवाचामगोचरं वस्तु तद्भवेत् । यतो वाचो निवर्त्तन्त इत्यादिश्रुतिप्रसिद्धिद्योतनार्थो हि शब्दः । ननु बुद्धेः क्षणिकत्वेनैकरूपेण तथा विचारितेऽपि पुनरन्यथैव भातीत्यत आह द्रष्टव्यमिति ॥ १३६ ॥

न केवलमयं विचारो ज्ञानसाधनमेवापि तु ध्यानसाधनमपीत्याह अनेनेति । अनेनैव प्रकारेण शुद्धचित्तानां वृत्तिज्ञानं उदेति ततः परंब्रह्मात्मिकावृत्तिर्भवेदिति योजना पदानामर्थस्तु स्फुट एव ॥ १३७ ॥

तमेव विचारं विशदयति द्वाभ्यां कारणमिति । आदौ प्रथमं कारणं व्यतिरेकेण कार्य्यविरहेण विचारयेत् पुनस्तत् कारणमन्वयेनानुवृत्त्या कार्य्येऽपि नित्यं प्रपश्यतीति ॥१३८॥

अथवैवं विचारयेदित्याह कार्य्येति । आदौ कार्य्यकारणमेव विचारयेत् पश्चात्तत्कार्य्यं विसर्जयेत् नानुसन्दध्यात् कार्य्यवर्जने सति कारणत्वं स्वत एव गच्छेत् । एवं कार्य्यकारणवर्जनेऽवशिष्टं सच्चिन्मात्रं मुनिर्मननशीलः स्वयमेव भवेदिति ॥ १३९ ॥

भावितं तीव्रवेगेन यद्वस्तु निश्चयात्मना ।
पुमांस्तद्धि भवेच्छीघ्रं ज्ञेयं भ्रमरकीटवत् ॥१४०॥
अदृश्यं भावरूपञ्च सर्वमेव चिदात्मकम् ।
सावधानतया नित्यं स्वात्मानं भावयेद्बुधः ॥१४१॥

ननु विचारजन्यापरोक्षज्ञानेन मुनेर्ब्रह्मत्वं भवतु नाम परन्तु परोक्षज्ञानिनः कथं भवेदित्याशङ्क्य तीव्रभावनया परोक्षज्ञानिनोऽपि ब्रह्मत्वं भवेदिति दृष्टान्तमाह भावितमिति । अयं भावः यद्यपि परोक्षज्ञानेन प्रमातृगतावरणनिवृत्तौ सत्यामपि प्रमेयगतमावरणं न निवर्त्तते तथापि निश्चयात्मना निश्चययुक्तबुद्धिमता पुरुषेण यद्वस्तु सच्चिदानन्दब्रह्म तीव्रवेगेनाऽहर्निशं ब्रह्माकारवृत्त्या भावितं चिन्तितं तद्वस्तु ज्ञेयमपरोक्षेण ज्ञातुं योग्यं ब्रह्म शीघ्रमचिरेण पुमान् भवेत् प्रत्यगभिन्नब्रह्मरूपो भवतीत्याहीति विद्वत्प्रसिद्धौ । तत्र सर्वलोकप्रसिद्धं दृष्टान्तमाह भ्रमरकीटवदिति । भ्रमरेण कुतश्चिदानीय जीवन्नेव स्वकुड्यां [illegible]स्थितो यः कीटः स यथा भयात् भ्रमरध्यानेन भ्रमर एव भवति तद्वदिति ॥१४०॥

यदि पूर्वश्लोकोक्तदृष्टान्ते भावनाबलादेवान्यस्यान्यत्वं भवेत् तर्हि ब्रह्मविवर्त्तत्वेन ब्रह्मरूपस्य विश्वस्य ब्रह्मभावनया तद्रूपता भवेदिति किमु वक्तव्यमित्याशयेन सर्वात्मभावनामाह अदृश्यमिति । अदृश्यं परोक्षं भावरूपं प्रत्यक्षञ्च सर्वं विश्वम् । यद्वा अदृश्यं द्रष्टृरूपं भावरूपं दृश्यं चकाराद्दर्शनम् एतत् सर्वं त्रिपुट्यात्मकं निर्विशेषस्फुरणमात्रस्वरूपं स्वात्मान-

दृश्यं ह्यदृश्यतां नीत्वा ब्रह्माकारेण चिन्तयत्।
विद्वान्नित्यसुखे तिष्ठेद्धिया चिद्रसपूर्णया ॥ १४२ ॥
एभिरङ्गैः समायुक्तो राजयोग उदाहृतः।
किञ्चित् पक्वकषायाणां हठयोगेन संयुतः ॥ १४३ ॥
परिपक्वं मनो येषां केवलोऽयञ्च सिद्धिदः।

मेव बुधः अद्वैतज्ञाननिष्ठः सावधानतया स्थिरवृत्त्या नित्यं भावयेत्। सकलमिदम् … च ब्रह्मैवेति सर्वदा पश्येदित्यर्थः ॥ १४१ ॥

एतदेव विवृणोति दृश्यमिति। दृश्यं घटादिकमदृश्यतामधिष्ठानचिद्रूपतां नीत्वा। हीति विद्वत् प्रसिद्धौ। ब्रह्माकारेण कल्पितस्य परिच्छिन्नस्य नामरूपादेर्निवृत्तिपूर्वकं बृहदाकारेणापरिच्छिन्नरूपेण चिन्तयेदित्यर्थः। ततः किमत आह विद्वानिति। चिद्रसपूर्णया चिदेव रसश्चिद्रसश्चिदानन्दस्तेन पूर्णया धिया नित्यसुखे अविनाशिसुखे विद्वांस्तिष्ठेदिति ॥ १४२ ॥

इदानीमुक्तं स्वाभिमतयोगमुपसंहरति एभिरिति। किञ्चित् स्वल्पं पक्वाः दग्धाः कषायारागादयो येषां तेषां हठयोगेन पातञ्जलोक्तेन प्रसिद्धेनाष्टाङ्गयोगेन संयुतोऽयं वेदान्तोक्तो योग इति। शेषं स्पष्टम् ॥ १४३ ॥

अयं राजयोग एव तेषां योग्य इत्याकाङ्क्षायां सर्वग्रन्थार्थमुपसंहरन्नाह परिपक्वमिति। येषां मनः परिपक्वं रागादिमलरहितमिति यावत् तेषामित्यध्याहारः। तेषां जितारि-

गुरुदैवतभक्तानां सर्वेषां सुलभो जवात् ॥१४४॥

इति श्रीपरमहंसपरिव्राजकाचार्य्य-श्रीमच्छङ्कर-भगवता विरचिता अपरोक्षानुभूतिः समाप्ता।

षड्वर्गाणां पुरुषधूरन्धराणां केवलः पातञ्जलाभिमतयोग-निरपेक्षः अयं वेदान्तादिमतो योगः सिद्धिदः प्रत्यगभिन्न-भिन्नब्रह्मापरोक्षज्ञानद्वारा स्वस्वरूपावस्थानलक्षणमुक्तिप्रदः। चकारोऽवधारणे नान्येषामपरिपक्वमनसामित्यर्थः। ननु परिपक्वमनस्त्वमतिदुर्लभमित्याकाङ्क्षायामस्यापि साधनत्वा-दतोऽप्यन्तरङ्गसाधनमाह गुरुदैवतभ[illegible]नामिति। जवादति-शीघ्रमित्यर्थः। सर्वेषामिति पदेन वर्णाश्रमादिनिरपेक्षं मनुष्यमात्रं ग्रहीतव्यं अतएव गुरु[illegible]वतभक्तेरन्तरङ्गत्वम्। तथा च श्रुतिः यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिताह्यर्थाः प्रकाशन्ते महात्मनः इति। स्मृतयश्च तद्विद्धि प्रणिपातेन श्रद्धावान् लभते ज्ञानमित्याद्याः। अयं भावः परिपक्वमनसोरपि दुःसाध्यानि साधनानि गुरुदैवत-भक्तानां सुसाध्यानि भवन्तीति हेतोर्गुरुदैवतभजनमेव स्वधर्म्माविरोधेन सर्वैः कार्य्यमिति परमं मङ्गलम् ॥ १४४ ॥

पूर्णेयमापरोक्षेण नित्यात्मज्ञानकाशिका।
अपरोक्षानुभूत्याख्याग्रन्थराजप्रदीपिका ॥ १ ॥
नमस्तस्मै भगवते ! शङ्कराचार्य्यरूपिणे !।
येन वेदान्तविद्येयमुद्धृता वेदसागरात् ॥ २ ॥
यद्ययं शङ्करः साक्षाद् वेदान्ताम्भोजभास्करः।
नोदेष्यत्तर्हि काशेत कथं व्यासादिसूत्रितम् ॥ ३ ॥

अत्र यत्सम्मतं किञ्चित्तद्गुरोरेव मे न हि।
असम्मतन्तु यत्किञ्चित्तन्ममैव गुरोर्न हि॥ ४॥
यत्प्रसादादहंशब्दप्रत्ययालम्बनो हि यः।
अहं स जगदालम्बः कार्य्यकारणवर्जितः॥ ५॥
तस्य श्रीगुरुराजस्य पादाब्जे तु समर्पिता।
दीपिका मालिका सेयं तत्कृपागुणगुम्फिता॥ ६॥

योऽहं स्वाज्ञानमात्राज्जगदिदमभवं स्वादिदेहान्तमादौ
स्वस्वप्नादिव देव सोऽहमधुना स्वज्ञानतः केवलम्।
ब्रह्मैवास्म्यद्वितीयं परमसुखमयं निर्विकारं विबाधं
जाग्रत् स्वानवदेव [illegible] गुरुसत् स्वल्पप्रसादोत्थितात्॥ [illegible]

इति श्रीपरमहंस[illegible]रिव्राजकाचार्य्य-श्रीविद्यारण्यमु[illegible]
विरचिता अपरो[illegible]नुभूतिदीपिका समाप्तिमगमत्।

प्रकाशक—श्रीभुवनचन्द्र वसाक।
(८ नं० निमतलाघाट ष्ट्रीट्)
प्रिण्टर—श्रीरामनारायण पाल।
(१६ नं० नूतन पगयापटी)

IGNCA RAR
ACC. No. R-475

Indira Gandhi National
Centre for the Arts